॥ श्रीजिनाय नमः ॥

# ॥ श्रीधम्मिलचरित्रं भाषांतरोपेतं ॥

( तृतीयो भागः )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४०. विक्रमसंवत—१९७१. सने—१९१४.

किं. रु.–३–८–०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर.

Serving JinShasan
049535
gyanmandir@kobatirth.org

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीधम्मिल्लचरित्रं भाषांतरोपेतं प्रारभ्यते ॥

( तृतीयो भागः )

( मूलकर्त्ता—श्रीजयशेखरसूरिः )

भाषांतरकर्त्ता— श्रावक मनसुखलाल हीरालाल हंसराज. ( जामनगरवाळा )

ततस्ता ददिरे तस्या । विषं विषयगृध्नवः ॥ आचरंति न किं पापं । विषयार्त्ता हि योषितः ॥
॥ ७ ॥ अथासमाप्तभोगेच्छा । रौद्रध्यानवशंवदा ॥ मृत्वा सा नरकं तुर्यं । प्राप पापभरेरिता ॥८॥
ततोऽप्युध्धृत्य संसार–मनंतं सा भ्रमिष्यति ॥ सहिष्यते च दुःखानि । दुःसहानि पदे पदे ॥ ९ ॥

पछी तेओए विषयमां लालचु बनीने ते कनकवतीने झेर आप्युं, केमके विषयांध स्त्रीओ शुं पाप आचरती नथी? ॥ ७ ॥ हवे भोगोनी इच्छा समाप्त नहि थवाथी रौद्रध्यानमां पडेली ते कनकवती पापोना समुहथी प्रेराइथकी मरीने चोथी नरके गइ. ॥ ८ ॥ त्यांथी पण निकळीने ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भगवान् गुणवर्मापि । गुरोरागमितागमः ॥ विजहार महीपीठे । निःसंगो वायुवच्चिरं ॥ १० ॥ स
ह्नस्तपतपःकर्म—क्षालिताखिलकल्मषः ॥ मखभुग्भवनं भेजे । कृतकालः समाधिना ॥ ११ ॥ तत-
श्च्युतः सुतत्वेना—वतीर्य विमले कुले ॥ स प्राप्तचरणप्रौढि–र्गता लोकोत्तरं पदं ॥ १२ ॥ इति नि-
शम्य कथां गुणवर्मणः । सुरसरिज्जलनिर्मलकर्मणः ॥ विषयविप्लवविभ्रमभंजनाद् । भवत सौख्य-
भुवः सततं जनाः ॥ १३ ॥ इति श्रीगुणवर्मकथा ॥

---

अनंतो संसार भमशे, अने पगले पगले विकट दुःखो सहन करशे. ॥ ९ ॥ हवे ते भगवान् गु-
णवर्मा मुनि पण गुरुपासे आगमोना जाणकार थइने वायुनीपेठे संगरहित घणा काळसुधि पृ-
थ्वीपर विहार करवा लाग्या. ॥१०॥ आकरा तपथी सर्व कर्मोरूपी पाप धोइने समाधिपूर्वक काळ
करीने ते देवलोकमां गया. ॥ ११ ॥ पछी त्यांथी चवीने निर्मल कुलमां अवतरीने चारित्रनी प्रौ-
ढता मेळवीने ते मोक्षे जशे. ॥ १२ ॥ एवी रीते देवगंगासरखा निर्मल आचरणवाला गुणवर्मा-
नी कथा सांभळीने हे लोको! तमो विषयोनी खराबीनो भंग भांगीने हमेशां सुखोना स्थानरूप
थाओ? ॥ १३ ॥ एवी रीते श्रीगुणवर्मा कुमारनी कथा संपूर्ण थइ. ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वेति धम्मिलः स्माह । साधो साधु वदन्नसि ॥ मयापि सेहिरे क्लेश—राशयो विषयाशया ॥ १४ ॥ वद त्वया कथं दुःखं । सोढं प्रौढपराक्रम ॥ मुनिपृष्टेनेति पृष्टे । सहासं धम्मिलोऽभ्यधात् ॥ १५ ॥ इह दुःखं न यः प्राप्तो । दुःखं हर्तुं न यः क्षमः ॥ दुःखे श्रुते न यो दुःखी । दुःखं किं तस्य कथ्यते ॥ १६ ॥ वत्स दुःखमहं प्राप्तो । दुःखं हर्तुमहं क्षमः ॥ दुःखे श्रुते सदुःखोऽस्मि । तद्दुःखं मे निवेदय ॥ १७ ॥ इत्युक्ते मुनिनाथेन । करुणाकरचेतसा ॥ स स्वं विश्वं जगौ वृ-

---

ते सांभळीने धम्मिल बोल्यो के हे मुनिराज! आपे बरोबर कह्युं छे, में पण विषयोनी आशाथी जथ्थाबंध दुःखो सहन कर्यां छे. ॥ १४ ॥ हे महापराक्रमी! तें केवी रीते दुःख सहन कर्युं छे? एम ते मुनिए पूछवाथी धम्मिल हास्यसहित बोल्यो के, ॥ १५ ॥ जे आ जगतमां दुःख पाम्यो नथी, तेमज जे दुःख हरवाने समर्थ नथी, तथा (परंतु) दुःख सांभळवाथी जे दुःखी थतो नथी, तेनी आगळ दुःख शुं कहेवुं? ॥ १६ ॥ (त्यारे मुनिए कह्युं के) हे वत्स! में दुःख वेठयुं छे, तेम दुःख हरवाने पण हुं समर्थ छुं, वळी (परंतु) दुःख सांभळीने हुं दुःखी थउं छुं, माटे ते (तारुं) दुःख मने निवेदन कर? ॥ १७ ॥ दयाळु मनवाळा मुनिराजे एम कहेवाथी ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्तं । वेश्यापरिजवावधि ॥ १८ ॥ अथ दंतांशुनिर्धौतां । मुनिर्वाचमुपाददे ॥ सेहे कष्टं मयाऽनिष्टं । यत्तदुत्तम संशृणु ॥ १७ ॥ अस्वपामिव पाथोधि—स्त्विषामिव दिनाधिपः ॥ अवंती नाम निःशेष—श्रियां जनपदः पदं ॥ १८ ॥ पुरी तत्रास्त्युज्जयिनी । जयिनी मरुतां पुरः ॥ त्रिवर्गसाधनफला । पुष्णंती शर्मकेवलं ॥ १९ ॥ मंत्रपूर्वं प्रतापाग्नौ । हुत्वा माषानिव द्विषः ॥ कृतेतिशांतिकस्तत्र । जितशत्रुरभून्नृपः ॥ २० ॥ करे करं प्रयच्छंतो । यस्य पौरुषधारिणः ॥ पुरंध्रय इवाजवन् । पा

---

म्मिल्ले वेश्याए पराभव कर्यो त्यांसुधी पोतानुं समस्त वृत्तांत कही संजळाव्युं. ॥ १८ ॥ हवे ते मुनिराज पोताना दांतोना किरणोथी धोएली वाणी बोल्या के, हे उत्तम! में जे विकट कष्ट सहन कर्युं छे ते तुं सांजळ? ॥ १७ ॥ जळनो जेम महासागर तथा तेजनो जेम सूर्य तेम सर्व लक्ष्मीना स्थानसरखो अवंती नामे देश छे. ॥ १८ ॥ त्यां देवनगरीने जीतनारी त्रणे वर्गो साधवाना फळवाळी अने केवळ सुखनेज पोषनारी उज्जयिनी नामे नगरी छे. ॥ १९ ॥ मंत्रपूर्वक ( विचारपूर्वक ) अमदनीपेठे शत्रुउने प्रतापरूपी अग्निमां होमीने उपद्रवनी शांति करनारो त्यां जितशत्रु नामे राजा हतो. ॥ २० ॥ ते बळवान राजाना हाथमां कर आपता एवा अन्य राजाउने

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ल्लनीयाः परे नृपाः ॥ २१ ॥ तस्यामोघरथः क्षात्र—सारः सारथ्यमाप्तवान् ॥ हरिणेवार्जुनो येन ।
सांयुगीनो नृपोऽजनि ॥ २२ ॥ वधूर्विधूतदोषाऽभूत । तस्य नाम्ना यशोमती ॥ सा गृहालंकृतिस्त-
स्याः । पुनः शीलमलंकृतिः ॥ २३ ॥ तयोरगलदत्ताख्यः । समये तनयोऽजनि ॥ पिता तस्मिन्
शिशावेव । जगाम यमसद्मनि ॥ २४ ॥ शोकेन हृदसंमाता । मातास्य व्यलपत्तरां ॥ किमेतद् दृ-
ढघातित्वं । हा धातः कातरे जने ॥ २५ ॥ स्वयं संयोज्य मिथुनं । स्वयमेव विभिंदतः ॥ पुराण-

---

अंतःपुरनी स्त्रीजनीपेठे तेने पाळवा पडता हता. ॥ २१ ॥ ते राजानो अमोघरथ नामे एक उ-
त्तम क्षत्री सारथी हतो, के जे सारथीवडे विष्णुवडे जेम अर्जुन तेम राजा रणसंग्राममां जय पा-
मतो हतो. ॥ २२ ॥ ते सारथिने दोषरहित यशोमती नामे स्त्री हती. ते स्त्री घरने शोभावनारी
हती, अने तेणीने शील शोभावतुं हतुं. ॥ २३ ॥ तेउने योग्य समये अगलदत्त नामे पुत्र थ-
यो, परंतु हजु तो ते बालक हतो तेवामांज तेनो पिता मृत्यु पाम्यो. ॥ २४ ॥ त्यारे हृदयमां न-
हि समाता शोकवडे तेनी माता विलाप करवा लागी के हे विधाता! आ कायर मनुष्यपर तें
आवो कारी घा केम कर्यो? ॥ २५ ॥ वळी हे विधाता! आप पुराणपुरुष छतां पण पोतेज जोडुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्यापि ते धातः । किमेतद्बालचापलं ॥ २६ ॥ अंगना रंगनाशाय । प्रायेण पथिकेष्विति ॥ कि-
मायतपथारूढ । न मां नाथ सहाग्रहीः ॥ २७ ॥ प्राणेऽभ्योऽपि प्रियासीति । मिथ्या मामवदस्तदा
॥ प्राणानादाय मुक्त्वा मां । गतोऽसि कथमन्यथा ॥ २८ ॥ जननीं वीक्ष्य दुःखार्त्ता—मपि बाल-
श्चिखेल सः ॥ परहर्षविषादेशु । बालका हि बहिर्मुखाः ॥ २९ ॥ मुंचन्नगलदत्तोथ । बाल्यं व्य-
क्तमना मनाक् ॥ निपत्य पादयोर्मातुः । वंदंत्या इत्युवाच सः ॥ ३० ॥ तव वर्षासरःप्राये । नि-

मेळवीने पोतेज तेने जे भांगी नाखो छो, एवी बालकजेवी चेष्टा शुं आपने योग्य छे? ॥ २६॥
वळी हे नाथ! प्रायें करीने पंथीजनने (साथे रहेली) स्त्रीओ तेओना रंगने नाश करनारी कहे-
वाय छे, परंतु आप तो ज्यारे लांबी मुसाफरीये चाल्या तो पछी मने साथे शामाटे न लेइ गया?
॥ २७ ॥ तुं मने प्राणोथी पण प्रिय छो एम मने ते वखते फोकटज आप कहेता हता, जो एम
न होत तो मने छोडीने तथा प्राणो लेइने आप शामाटे चाल्या गया? ॥ २८ ॥ एवी रीते पो-
तानी माताने दुःखी जोइने पण ते बाळक तो गम्मत करवा लाग्यो, केमके परना हर्ष अथवा
शोकमाटे बालको बेदरकार रहे छे. ॥ २९ ॥ पछी ते अगलदत्त बाल्यपणुं वीत्याबाद जरा समज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्यमंब किमंबके ॥ किं च ते गैरिकग्रस्त—गोधूमान्न तनुस्तनुः ॥ ३१ ॥ जगौ यशोमती वस्त्रां—
चलेनोन्मृष्टलोचना ॥ अस्तोकशोकसंकीर्ण—गलप्रस्खलदक्षरं ॥ ३२ ॥ वत्स नृणां स्फुटेद्दुःख—
पूर्णं हृदयपल्वलं ॥ यदि तन्निर्गमोपायो । न स्यादश्रुछलाद् दृशोः ॥ ३३ ॥ प्रौढेऽप्यश्रुपयःपूरे ।
दीप्यमानेव मे तनुः ॥ दग्धा भर्तृवियोगोर्वा—ग्निना पुष्टिं दधाति किं ॥ ३४ ॥ देहछाया विभूषा

---

णो थवाथी रडती माताने पगे पडी बोल्यो के, ॥ ३० ॥ हे माता! तमारी बन्ने आंखो हमेशां व·
र्षाकाळना तळावजेवी केम छे? तेमज तारुं शरीर पण गेरु लागेला घउं सरखुं केम दुर्बल छे?
॥ ३१ ॥ त्यारे यशोमती वस्त्रना छेडाथी आंखो लुछीने अत्यंत शोकथी भराइ गयेल गळांमांथी
लथडता अक्षरोथी बोली के, ॥ ३२ ॥ हे वत्स! जो आंखोना अश्रुना मिषथी दुःखने निकळवा·
नो उपाय न होय तो दुःखोथी भरेलुं माणसोनुं हृदयरूपी खाबोचीउं फुटी जाय. ॥ ३३ ॥ जो
के आंसुउरूपी जलनो समुद्र घणो छे, तो पण मारुं बळतुं शरीर जाणे स्वामिना वियोगरूपी व·
डवानलथी दग्ध थयुं होय नहि तेम शीरीते पुष्ट थइ शके? ॥ ३४ ॥ वळी स्वामिना मृत्युबाद
शरीरनी शोभा, आभूषण, ( घरनी ) मालीकी, अभिमानपणुं तथा सुख ए पांच वस्तुउ होती

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च । स्वामित्वमभिमानिता ॥ सुखं च पंच नारीणां । न संत्यसति वल्लभे ॥ ३५ ॥ तत्रापि वत्स
बालोऽसि । दिधेति त्वत्पितुः पदं ॥ चलप्रेमा ददौ भूमा-निहाभ्येत्य प्रहारिणे ॥ ३६ ॥ दधाति
सोऽधुना बाढं । नवं प्राप्य पदं मदं ॥ विभवस्य ज्वरस्येव । प्रथमोष्मा मि दुस्सहः ॥ ३७ ॥ यदा
दव इवाग्रेऽसा-वेति हेतीः प्रपंचयन् ॥ तदा मे गलनो नेत्रे । धीर घूमांधिते इव ॥ ३८ ॥ अ-
स्फुटिष्यन्महाजात । कलिका कापि चेत्तव ॥ न संपद्भ्रमरीयं त-दत्रास्थास्यत्करीरके ॥ ३९ ॥ यो-

नथी. ॥ ३५ ॥ तेमां पण हे वत्स! तुं उमर अने बुद्धि बन्नेथी बालक छो, अने तेथी प्रेम उ-
तरी जवाथी तारा पितानी पदवी राजाए अहीं आवीने प्रतिहारने आपी छे. ॥ ३६ ॥ आज काल
ते प्रतिहार नवीन पदवी पामीने अत्यंत मद धारण करे छे, केमके ज्वरनीपेठे वैभवनी शरुआ-
तनी उष्णता दुःखे सहन थइ शके तेवी होय छे. ॥ ३७ ॥ वळी दावानलनीपेठे रोफ देखाड-
तो (ज्वाला विस्तारतो) ते ज्यारे नजीक आवे छे त्यारे हे धीर! मारी आंखो जाणे धूमांधित
थइ होय नहि तेम गळ्या करे छे. ॥ ३८ ॥ वळी हे पुत्र! जो तारी कळी कइंक पण खीली हो-
त तो आ संपदारूपी भमरी कंथेरसरखा ते प्रतिहारप्रते विश्राम करत नहि. ॥ ३९ ॥ स्त्रीजन्ममां

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

षिज्जन्मनि सुप्रापं । न वैधव्यं दुनोति मां ॥ दुनोति यत्पदं भर्तु—रन्यत्र त्वयि स यपि ॥ ४० ॥
क्षमा यतित्वे शृंगारो—ऽगारिणां त्वभिमानिता ॥ प्रवृष्टिर्बीजे हिमो मावे । निदावेऽरिष्टकृत्पुनः ॥
॥ ४१ ॥ वीक्ष्य वह्नेः पितुस्तेजो । परावृतं दिवाकृता ॥ धूमेनापि घनीभूया—च्छाद्यते तस्य मंडलं
॥ ४२ ॥ प्रारंभे गर्भगंडोला । बाल्ये विण्मूत्रगर्त्तशूकराः ॥ तारुण्ये च मदाभ्रौंडाः । प्रायः पुत्राः सह-
स्रशः ॥ ४३ ॥ मातृकुक्षिदरीसिंहा । बाल्ये बंधुदृशां सुधा ॥ यौवने कुलधौरेया । छित्रा एव सु-

---

सुलभ एवा विधवापणामाटे मने दुःख थतुं नथी, परंतु तुं जनां मारा स्वामिनी पदवी जे बीजाने
हाथ गइ छे तेथी मने घणुं दुःख थाय छे. ॥ ४० ॥ क्षमा मुनिपणाने शोभावनारी छे. गृहस्थो-
ने अभिमान शोभावनारुं छे, बीजने वृष्टि शोभावनारी छे, तथा माघमासने हिम शोभावनारुं छे,
परंतु उनाळामां पडेलुं हिम नुकशानकारक छे. ॥ ४१ ॥ पोताना पिता अग्निनुं तेज सूर्ये लोपे-
लुं जोइने शुं धूमाडो एकठो थइने सूर्यना मंडलने आछादित करतो नथी? ॥ ४२ ॥ प्रारंभमां
गर्भना कीडासरखा, बाल्यपणामां विष्टामूत्रमां खरडाता डुकरसरखा तथा यौवनवयमां मदोन्मत्त थ-
येला एवा प्रायें करीने हजारो पुत्रो होय छे. ॥ ४३ ॥ परंतु माताना उदररूपी गुफामां सिंहसर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताः पुनः ॥ ४४ ॥ परापत्पृच्छकाः प्रायः । पृथ्व्यां संति परःशताः ॥ विरला एव दृश्यंते । परापद्वं-
जना जनाः ॥ ४५ ॥ शोकांधकारितं सद्यो । विद्योतयिषसे यदि ॥ कुलदीप मुखं मातु-स्तदाक-
र्णय तत्परः ॥ ४६ ॥

इह ते सहते नव्या—धिकारी न कलाग्रहं ॥ संहते हंन दीपस्य । प्रभां किं शलभाः क-
चित् ॥ ४७ ॥ कोशांब्यामस्ति वप्तुस्ते । सतीर्थ्यो रसिकः सखा ॥ नाम्ना दृढप्रहारीति । रीतिज्ञः

खा, बाल्यपणामां स्वजनोनी दृष्टिमां अमृतसरखा, तथा यौवनवयमां कुटुंबनो भार उपाडनारा तो
कोइ वीरलाज पुत्रो नीवडे छे. ॥ ४४ ॥ वळी प्रायें परनुं दुःख पूछनारा तो सेंकडोगमे
माणसो आ दुनियामां छे, परंतु परनुं दुःख नाश करनारा तो वीरलाज देखाय छे. ॥ ४५ ॥ व-
ळी हे कुलदीपक पुत्र! शोकरूपी अंधकारथी झंखवाणुं थयेलुं आ तारी मातानुं मुख जो तुं तेज-
स्वी करवाने इछतो हो तो तुं सावधान थइने सांभळ? ॥ ४६ ॥

अहीं नवो अधिकारी तारा कलाभ्यासने सहन करशे नहि, केमके पतंगीयां शुं क्यांय दी-
पकनी कांति सहन करी शके छे? ॥ ४७ ॥ हवे कोशांबी नगरीमां शास्त्र अने शस्त्रोनी कळामां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शास्त्रशास्त्रयोः ॥ ४८ ॥ तमुपेत्य कलाभ्यासं । कुरु वत्स गुणाकर ॥ पालयस्व पदं चंद्र । इव आ-
मकलः पुनः ॥ ४९ ॥ मातुः शिक्षामिमां मूर्ध्नि । नीत्वा रत्नवतंसतां ॥ तद्दत्तशंबलालंबी । कौशां-
बीमाप स क्रमात ॥ ५० ॥ पितृमित्राय तत्राथ—मुत्सुकः समगच्छत ॥ तेनापि पृच्छता शुद्धिं । सो
ऽवदयत कथंचन ॥ ५१ ॥ ततः स्वांके निवेश्यैन—माश्लिष्य च जगाद सः ॥ वत्स महाकुलस्या-
पि । किं दशेयमभूत्तव ॥ ५२ ॥ पितृशोकान्नवीभूतात् । किरन्नश्रूण्यसावपि ॥ पितुर्मृत्युमुदित्वोचे

---

प्रवीण तारा पितानो सहाध्यायी तथा हुशियार दृढप्रहारी नामे मित्र वसे छे. ॥ ४८ ॥ माटे हे
गुणवान पुत्र! तेनी पासे जइने तुं कलाभ्यास कर? अने पछी चंद्रनीपेठे कलावान थइने ता-
री पदवीनुं पालन कर? ॥ ४९ ॥ एवी रीतनी मातानी शिखामणने रत्नना मुकुटनीपेठे मस्तके
चडावीने तेणीए आपेलुं भातुं लेइने ते अनुक्रमे कोशांबी नगरीमां गयो, ॥ ५० ॥ तथा उत्सु-
क बनेलो एवो ते अगलदत्त त्यां पोताना पिताना मित्रने मल्यो, त्यारे तेणे पण खबरअंतर पू-
छतां केटलीक मुश्केलीए तेने ओळखी कहाड्यो. ॥ ५१ ॥ पछी तेणे तेने पोताना खोळामां बे-
साडीने तथा भेटीने कह्युं के हे वत्स! तारी कुलीननी पण आवी दशा केम थइ? ॥ ५२ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

। स्वस्यागमनकारणं ॥ ५३ ॥ रुदन्नुदश्रुदुःखेन । गद्गदोक्तिर्जगाद सः ॥ दृक्सुधामत्र हा मित्र । क्व मया दृश्यसे पुनः ॥ ५४ ॥ अकस्मादश्मवृष्टयेव । तवाऽकल्याणवार्त्तया ॥ श्रवणाध्वगया स-द्यो । हृदयं स्फुटतीव मे ॥ ५५ ॥ वत्स त्वमपि विह्वाय—वदनो मा रुदः सदा ॥ अक्षीणशक्तिदे-वेंद्रे—ष्वपि दैवं विचिंतय ॥ ५६ ॥ कलाकुलीनतारूप—विद्यावीर्यादयो गुणाः ॥ दैवदावानलस्या-ग्रे । यांति जीर्णतृणोपमां ॥ ५७ ॥ निरस्य शोकमभ्यस्य । कला इह कुलोद्वह ॥ त्वमेव नवतां

---

त्यारे ताजा थयेला पिताना शोकथी तेणे पण आंसु खेरवतांथकां पोताना पितानुं मरण कहीने पोताना आववानुं कारण कह्युं. ॥ ५३ ॥ त्यारे ते दृढप्रहारी पण दुःखथी रुदतोथको आंखोमां आंसु लावीने गद्गद कंठे बोल्यो के आंखोमां अमृतनी नहेरसरखा हे मित्र! हवे फरीने तुं मने क्यां देखाइश? ॥ ५४ ॥ अचानक पत्थरना वरसादनीपेठे तारां मृत्युनी वात कर्णगोचर थवाथी मारुं तो जाणे हृदय फाटी जाय छे. ॥ ५५ ॥ हवे हे वत्स! तुं पण हमेशां निरानंद मुखवाळो थइने रुम नहि, महाशक्तिवाळा देवेंद्रोनां दैवनो पण तुं विचार कर? ॥ ५६ ॥ कला, कुलीन-पणुं, रूप, विद्या तथा वीर्य आदिक गुणो पण कर्मरूपी दावानलपासे जीर्ण घाससरखी दशा पा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्त । इवामोघरथो भव ॥ ५८ ॥ एवं तद्वाक्यपीयूष—पानध्वस्ताध्वजश्रमः ॥ सततं स ततोऽध्ये-तुं । प्रावर्त्तत शुभेऽहनि ॥ ५९ ॥ अस्मै सुतधिया सोऽपि । कलानत्वमुपादिशत् ॥ योग्यशिष्येषु गोपायन् । नाम्नायं पापभाग्गुरुः ॥ ६० ॥ सकुंतलाभा सद्बाण—स्फुरदद्भुतविग्रहा ॥ अस्य यूनो धनुर्वेद–विद्या बाढं प्रियाभवत् ॥ ६१ ॥ नवोपात्तकलाभ्यास–कौतुकी स सदा ययौ ॥ प्रातः प्रात-रनाबाधः । स्वगुरोर्गृहनिष्कुटं ॥ ६२ ॥ नालस्य धाम्नि सद्वृते । सूर्यालोकाधिकस्वरे ॥ शुचिपक्षा-

---

मे छे. ॥ ५७ ॥ हवे हे कुलीन! शोक छोडीने तथा अहीं कलानो अभ्यास करीने तुं पोतेज नवा अमोघरथसरखो था? ॥ ५८ ॥ एवी रीतना तेना वचनरूपी अमृतपानथी मार्गनो थाक दूर थवाथी तेणे शुभ दिवसे निरंतर कलाभ्यासनो प्रारंभ कर्यो. ॥ ५९ ॥ ते दृढप्रहारीए पण तेने पुत्रमाफक लेखीने कलाभ्यास कराव्यो, केमके योग्य शिष्योप्रते पण कला छुपावनारो गुरु महा-पापी कहेवाय छे. ॥ ६० ॥ भालांनी कलाना लाभवाळी (चोटलानी शोभावाळी) उत्तम बाण-थी स्फुरायमान थता अद्भुत संग्रामवाळी (शरीरवाळी) एवी धनुर्वेदनी विद्या ते युवानने स्त्री-सरखी प्रिय थइ पडी. ॥ ६१ ॥ नवो कलाभ्यास करवामां उत्सुक बनेलो ते अगलदत्त हमेशां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रिते तिष्ठ—त्यब्जे श्रीः पुंसि भारती ॥ ६३ ॥ अथान्यदा तदासन्न—वेश्मवातायनस्थिता ॥ तम-
भ्यासपरं काचि—न्मदिराक्षी निरैक्षत ॥ ६४ ॥ सोऽभ्यासवशतो बाह्यं । वेध्यं विध्यन्नवंध्यधीः ॥
विव्याध वस्तुतो वीर—श्चलं सूक्ष्मं च तन्मनः ॥ ६५ ॥ परिज्ञापयितुं स्वं सा । पुष्पवृष्टिमिवामरी ॥
फलोत्पलादिनिक्षेपं । तस्योपरि विनिर्ममे ॥ ६६ ॥ सोऽपि तां सुभगां पश्य—न्ननुरागं दधौ हृदि

---

कइं पण बाधाविना प्रभाते उठीने पोताना गुरुने घेर जतो. ॥ ६२ ॥ उद्योगना स्थानरूप ( नालना स्थानरूप ) उत्तम आचरणवाळा ( गोळाकार ) गुरुने जोइ आनंदित थनारा ( सूर्यने जोइ विकस्वर थनारा ) तथा पवित्र पत्रवाळा ( पांदडीवाळा ) कमळसरखा पुरुषमां लक्ष्मी अने सरस्वती रहे छे. ॥ ६३ ॥ हवे एक वखते तेनी नजीकना घरना झरुखामां बेठेली कोइक युवतीए अभ्यासमां तत्पर एवा ते अगलदत्तने जोयो. ॥ ६४ ॥ ते महाबुद्धिवान अगलदत्त अभ्यासने लीधे बाह्य लक्ष्यने तो विंधतो हतो, परंतु ते सुभटे मुख्यत्वे तो तेणीनुं चंचल अने सूक्ष्म मन वींधी नाख्युं. ॥ ६५ ॥ हवे ते युवती पोतानो अभिप्राय जणाववामाटे देवी जेम पुष्पवृष्टिने तेम तेनातरफ फल कमल आदिक फेंकवा लागी. ॥ ६६ ॥ त्यारे ते अगलदत्त पण ते मनोहर

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ न पुनः प्रकटीचक्रे । गुरुशंका गरीयसी ॥ ६७ ॥ एवं चाचिंतयन्नारी-विलासवशगं नरं ॥ विद्या सापत्न्यनीतेव । सेवते न कदाचन ॥ ६८ ॥ अहो धैर्यं पुरंध्रीणां । यदज्ञाततन्त्रे जने ॥ प्रक्रामंति पदं दातुं । तरण्य इव वारिधौ ॥ ६९ ॥ चेतस्तरौ गुरुपदप्रणयांबुसिक्ते । विद्याफलान्यविकलानि कथं प्रथंते ॥ सोऽयं सलीललललनाकलनातिगोक्ति—वात्याविवर्त्तविवशः परिधूयसे चेत ॥ ७० ॥ तस्थौ तमोमयी यत्र । कामिनी दर्शयामिनी ॥ हृदि दीपा क्षणात्तत्र । कला युक्तं क-

स्त्रीने जोइने हृदयमां अनुराग धरवा लाग्यो, परंतु तेणे ते प्रकट कर्यो नहि, केमके गुरुनो डर जबरो होय छे. ॥ ६७ ॥ वळी ते एम विचारवा लाग्यो के स्त्रीना विलासने वश थयेला पुरुषने विद्या सपत्नीपणाथी म्हरती होय नहि तेम कदापि पण तेने सेवती नथी. ॥ ६८ ॥ अहो! स्त्रीनुं केवुं धैर्य छे! के जेओ समुद्रमां जेम होडीओ तेम अजाण्या पुरुषमां पण पोतानो पगपेसारो करी दे छे, ॥ ६९ ॥ जो विलासी स्त्रीजनां न कळी शकाय एवां वचनरूपी वायुना वंटोळीयाना झपाटाथी मनरूपी वृक्ष अति कंपायमान थाय तो गुरुना चरणनी कृपारूपी जलथी सींचाया छतां पण ते वृक्ष विद्यारूपी मनोहर फलोने शीरीते विस्तारी शके? ॥ ७० ॥ जेना हृदयमां अमावा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

लावतः ॥ ७१ ॥ इत्युपेक्ष्यैव तां तस्य । प्रातः श्रमविधायिनः ॥ आविरासीध्दृदि न्यासी—कृतज्ञा-
त्रा कदापि सा ॥ ७२ ॥ रक्ताशोकतरोः शाखां । समालंब्य पुरः स्थितां ॥ वद कासि किमेतासि
। त्वं तन्वीति स तां जगौ ॥ ७३ ॥ अवदातोदयद्दंत—द्युतिदंभस्य दंभतः ॥ वरस्रजं क्षिपंतीव ।
स्नेहयोग्यं जगाद सा ॥ ७४ ॥ अहमेतद्गृहाध्यक्ष—यक्षदत्तस्य नंदिनी ॥ नामतः श्यामदत्तेति ।
त्वामपश्यं गवाक्षगा ॥ ७५ ॥ त्वां बाणवर्षिणं वीक्ष्य । स्पर्द्धिष्णुरिव मन्मथः ॥ मंथरांगीं स्वबाण-

---

स्यानी रात्रिसरखी अंधकारमय स्त्री रहेली छे त्यां कलावाननी ( चंद्रनी ) कला जे क्षणवारमां न-
ष्ट थाय छे ते युक्तज छे. ॥७१॥ एम विचारी तेणीनी उपेक्षा करीने अभ्यास करता एवा ते अ-
गलदत्तनी पासे एक दिवस प्रभातमां हृदयमां प्रेम धरनारी ते युवती प्रगट थइ. ॥ ७२ ॥ लाल
अशोकवृक्षनी माळी पकडीने सामे उभेली ते स्त्रीने अगलदत्ते कह्युं के हे तन्वि! तुं कोण छे?
तथा केम आवी छे? ॥ ७३ ॥ दांतोनी प्रकट थती श्वेत कांतिनी हारना मिषथी जाणे तेने वर-
माळा पहेरावती होय नहि तेम ते स्नेहाळ वचन बोली के, ॥ ७४ ॥ हुं आ घरना मालीक य-
क्षदत्तनी श्यामदत्ता नामनी पुत्री छुं, तथा झरुखामां बेशीने में तने जोयो छे. ॥ ७५ ॥ बाणो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नां । मंक्षु लक्षीचकार मां ॥ ७६ ॥ तत्प्रहाराकुलाऽनन्य—शरणा त्वां प्रपेदुषी ॥ तद्दोष्मन्नबलां क्रोडी—कृत्य मां रक्ष मारतः ॥ ७७ ॥ इत्युक्त्वागलदत्तस्य । पादयोर्निपपात सा ॥ कथंचन समुद्भाप्य । तेनेति प्रत्यबोध्यत ॥ ७८ ॥ सुधावेणिसदृग्वाणि । यदन्नाणि त्वया मम ॥ प्रबलप्रेमपाथोधेः । स वीचीनिचयः खलु ॥ ७९ ॥ ध्यानाद्रूपातिगात्सुभ्रु । निर्वृतिं योगिनो विदुः ॥ अहं तां तव रूपस्थ—ध्यानादेवाप्नुवं ध्रुवं ॥ ८० ॥ परं गैरेयगौरांगि । स्थातुर्गुरुकुले मम ॥ न हि नामां-

---

ने फेंकता एवा तने जोइने जाणे स्पर्धावाळो थयो होय नहि तेम कामदेव मने कंपित शरीरवाळीने पोताना बाणोथी मारवा लाग्यो छे. ॥ ७६ ॥ तेना प्रहारोथी व्याकुल थयेली तथा निराधार एवी हुं तारे शरणे आवेली छुं, माटे हे वीर! मने अबलाने आलिंगन देइने कामदेवथी मारुं रक्षण कर? ॥ ७७ ॥ एम कहीने ते अगलदत्तने पगे पडी. त्यारे ते पण केटलेक प्रयासे तेणीने उठाडीने प्रतिबोधवा लाग्यो के, ॥ ७८ ॥ हे अमृतनी नहेरसरखी वाणीवाळी! तें जे मने कह्युं ते खरेखर अत्यंत प्रीतिरूपी समुद्रना मोजांना समुहसरखुं छे. ॥ ७९ ॥ वली हे सुभ्रु! योगीओ रूपातीत ध्यानथी निवृत्ति कहे छे, हुं तो तारां रूपस्थ ध्यानथीज खरेखर ते निवृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गनासंग—रंगः संगतिमंगति ॥ ८१ ॥ वीरपुत्रोऽपि वीरोऽपि । बिभेम्येष गुरोः पुरः ॥ गुरुक्षेत्र
गतः सूरो—ऽप्युदास्तेऽखिलकर्मसु ॥ ८२ ॥ हसित्वा स्माह सा स्वामिन् । कामित्वं तव कीदृशं ॥
यः स्त्रीभिः प्रार्थितो धत्ते । गुर्वादिभ्यो भयं हृदि ॥ ८३ ॥ भेजे तल्पं गुरोरेव । शशी किं न क-
लारसी ॥ व्यमृशन्न तु निःशंकः । कलंकमपि भाविनं ॥ ८४ ॥ सोऽप्यूचे सत्यमेवैतत् । त्वरां मा-
स कृथाः पुनः ॥ सहादास्येऽरविंदास्ये । त्वामवंतीं व्रजन्नहं ॥ ८५ ॥ एकचितां कथंचित्तां । प्रत्या-

---

त्ति पाम्यो छुं. ॥ ८० ॥ परंतु हे गौरांगि! हुं ज्यांसुधी अहीं गुरुकुलमां रह्यो छुं त्यांसुधी स्त्रीना
संगनो रंग मारेमाटे योग्य गणाय नहि. ॥ ८१ ॥ हुं सुभटनो पुत्र अने सुभट छुं, छतां पण गु
रुथी डरुं छुं. केमके गुरुना क्षेत्रमां गयेलो सूर्य पण सर्व कार्योमां उदासीन थाय छे. ॥ ८२ ॥
त्यारे ते हसीने बोली के हे स्वामी! त्यारे तमारुं कामीपणुं ते केवुं? के जे स्त्रीए प्रार्थना कर्या
छतां हृदयमां गुरुआदिकनो भय धारण करे छे. ॥ ८३ ॥ कलाना रसिक चंद्रे पण शुं गुरुनीज
शय्या नथी भोगवी? अने तेम करवामां तेणे निःशंक थइने थनारा कलंकनो पण विचार क-
र्यो नथी. ॥ ८४ ॥ त्यारे अगलदत्ते पण कह्युं के हे कमलमुखी! ए वात सत्यज छे, परंतु तुं उ-

P.P. Ac. Gunratnasuri M.S.                                Jun Gun Aaradhak Trust

य्य शपथैरसौ ॥ तत्सौंदर्योदधौ मीन—न्मनाः स्वस्थानमीयिवान् ॥ ८६ ॥ तामुत्कीर्णामिव स्यूता—मिव लीनामिवान्वहं ॥ वहन् हृदि व्यलंघिष्ट । कतिचिद्वासरानयं ॥ ८७ ॥ धाम विद्यामयं बि-भ्र—दुध्धृत्तमिव वर्ष्मणः ॥ अन्यदा सुगुरोः पादौ । प्रणम्येति व्यजिज्ञपत ॥ ८८ ॥ अनुमन्यस्व मां राज्ञः । पुरः स्फारयितुं कलां ॥ कला अगुप्तरूपा हि । रूपाजीवा इव श्रिये ॥ ८९ ॥ अनु-

तावळ कर नहि, ज्यारे हुं उज्जयिनी जइश त्यारे तने साथे लेतो जइश. ॥ ८५ ॥ एवी रीते एक मनवाळी एवी तेणीने सोगनपूर्वक केटलेक प्रयासे प्रतीति करावीने तेणीना सौंदर्यरूपी स-मुद्रमां मत्स्यसरखां मनवाळो ते अगलदत्त पोताने स्थानके गयो. ॥ ८६ ॥ जाणे कोतरेली, सी-वेली अथवा लीन थयेली होय नहि एम हमेशां तेणीने हृदयमां धारण करता एवा ते अगल-दत्ते केटलाक दिवसो व्यतीत कर्या. ॥ ८७ ॥ शरीरमांथी जाणे उधरी कहाड्युं होय नहि एवां विद्यामय तेजने धारण करतो एवो ते अगलदत्त एक दिवसे गुरुने चरणे नमीने विनंति करवा लाग्यो के, ॥ ८८ ॥ हे गुरु! हवे मारी कला राजापासे देखाडवामाटे मने आज्ञा आपो? के-मके वेश्यानीपेठे प्रसिद्धिमां आवेली कला लक्ष्मी देनारी थाय छे. ॥ ८९ ॥ पछी गुरुए अनुज्ञा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञातोऽथ गुरुणा । पुरस्कृत्य तमेव सः ॥ गतः सदसि नृनाथ—मनमन्नमनोचितं ॥ ८० ॥ कोऽ-
यमैदंयुगीनेषु । जनेषु परमागमाक् ॥ इति पृष्टो नृपेणोचे । तत्कुलाद्यं कलागुरुः ॥ ८१ ॥ कां-
चित्कलामिलाभर्तु—र्दर्शयेति गुरोर्गिरा ॥ सोऽबध्नान्मल्लवद्वीर—वरः परिकरं दृढं ॥ ८२ ॥ प्रश-
स्तलस्तकन्यस्त—हस्तः स धनुषो गुणं ॥ ध्वनयंस्तत्प्रनिध्वानैः । सभारंध्राण्यदिध्वनत् ॥ ८३ ॥ सं-
स्थानपूर्वमिश्वास—मुक्तेष्वासशरव्यकं ॥ अविध्यच्चापलं चेतो । योगीव सुगुरोर्गिरा ॥ ८४ ॥ शा-

---

देवाथी तेनेज आगामी करीने ते राजसभामां गयो, तथा ते नमवालायक राजाने नम्यो. ॥८०॥ क-
आ काळना मनुष्योमां उत्कृष्ट भाग्यशालीसरखो आ वली कोण छे.? एम राजाए पूछ्याथी कलागुरुए ते अगलदत्तनुं कुल आदिक निवेदन कर्युं ॥ ८१ ॥ हवे राजाने तारी कइंक कला दे-
खाड? एम गुरुए कहेवाथी ते महासुभटे मल्लनीपेठे मजबूत काछो बांध्यो. ॥ ८२ ॥ मनोहर कामठांपर हाथ राखीने धनुषनी दोरीनो अवाज करतोथको ते तेना पडघाउथी सभानां द्वारोने पण अवाज कराववा लाग्यो. ॥ ८३ ॥ गुरुना वचनथी बरोबर चींत्रीने धनुषमांथी छोडेलां बाणथी योगी जेम मनने तेम तेणे तुरत एंधाणने वींधी नाख्युं. ॥ ८४ ॥ पछी ते आकाशमां स-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

णोत्तीर्णामसिलतां—मसौ वियति नर्त्तयन् ॥ अनभ्रविद्युदारेक—मकांडे निर्ममे नृणां ॥ ८५ ॥
चकासे चतुरश्चक्रं । चालयन्नेकपाणिना ॥ चिरं चरटचक्रस्य । चालनां सूचयन्निव ॥ ८६ ॥ सोऽ-
दभ्रं भ्रमयन् लोहं । मुद्गरं वेगतोऽभितः ॥ अभूतपूर्वं पार्षद्यानां । भयक्षोभमशिक्षयत् ॥८७॥ दंभ-
तांडवयंश्चक्रे । दृष्टॄणामिति संभ्रमं ॥ युगपज्जगतीं जग्धुं । यमः किमयमाययौ ॥ ८८ ॥ तयोल्ल-
लास शस्त्रे स । मुक्तामुक्तोभयात्मके ॥ यथासन् जरसीवेभा । निर्मदाः सुभटाः परे ॥ ८९ ॥ ये-

जेली तलवार नचावतोथको अकाळे वादळांविना पण लोकोने विजळीना चमकाराजेवुं देखाडवा लाग्यो. ॥ ८५ ॥ पछी ते चतुर सुभट एक हाथे चक्र भमावतोथको घणा काळसुधी जाणे कुं-भारना चक्रनुं चालवुं सूचवतो होय नहि तेम शोभवा लाग्यो. ॥ ८६ ॥ वळी ते अटकावरहित लोखंडनुं मुद्गर वेगथी चारे बाजु भमावतोथको सभासदोने अगाउ कदी न थयेलो एवो भय-नो क्षोभ उपजाववा लाग्यो. ॥ ८७ ॥ पछी ते दंभ उगाळतोथको जोनाराओने एवो भय पमा-डवा लाग्यो के शुं एकी वखते जगतने खावामाटे आ यम आवेलो छे? ॥ ८८ ॥ पछी ते मु-केलां अने नहि मुकेलां एम बन्ने प्रकारनां शस्त्रोमां एवी तो स्फुर्ति देखाडवा लाग्यो के जेथी

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

षां वपुः शिलासार-सारैरिव विधिर्व्यधात ॥ तत्रामन्यत मल्लांस्तान् । स गोमयमयानिव ॥ १७०० ॥ तृणायापि न मन्यंते । ये योधानायुधोत्कटान् ॥ सोऽजैषीत्तानिभानोजः—खानिः खानीव सुव्रतः ॥१॥ स्वां कलां लालयत्येवं । तस्मिन् विस्मितचेतसः ॥ मूर्धानं धूनयामासु—र्गुणक्रीताः सभासदः ॥ २ ॥ स्तुतिनिंदाविधौ वंध्य—मनसोऽथ मुनेरिव ॥ मुखमेष महीपस्य । पश्यतिस्म पुनः पुनः ॥ ३ ॥ भूपोऽवग्भद्र मे चित्रं । नानया कलया तव ॥ चेष्टंते बहवोऽप्येवं । प्रायेणोदरपूर्त्तये

---

घमपणमां जेम हाथीउ तेम अन्य सुभटो मदरहित थइ गया. ॥ ९९ ॥ जेउनुं शरीर विधाताए पत्थरना सारवडे बनाव्युं छे, ते मल्लोने पण ते गणना बनावेला मानतो हतो. ॥ १७०० ॥ जे हाथीउ हथियारबंध योधाउने पण तृणसमान मानता हता. ते हाथीउने पण मुनि जेम इंद्रिउने तेम बळनी खाणसरखो ते अगलदत्त जीतवा लाग्यो. ॥ १ ॥ एवी रीते ते ज्यारे पोतानी कला देखाडवा लाग्यो त्यारे तेना गुणोथी विस्मय पामेला सभासदो मस्तक धुणाववा लाग्या. ॥ २ ॥ परंतु मुनिनीपेठे स्तुति अने निंदाथी रहित मनवाळा राजानुं मुख ते फरी फरीने जोवा लाग्यो. ॥ ३ ॥ त्यारे राजा बोल्यो के हे भद्र! मने तारी आ कलाथी आश्चर्य थतुं नथी,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४ ॥ धनेन धीर कार्यं चे—त्तद्याचस्व यथारुचि ॥ आशाभंगं न कस्यापि । कुर्मो जैना दयालवः ॥ ५ ॥ सोऽप्यूचे किमहं भिक्षु—र्यत्वत्तः कामये धनं ॥ धनश्रेणीस्तृणीयंति । यशस्कामा हि मानिनः ॥ ६ ॥ प्रियालापेऽपि दारिद्र्यं । यस्य किं वा स दास्यति ॥ वृथा फलाशा पांथानां । छायासंशयिनि द्रुमे ॥ ७ ॥ दत्तं वा प्रियवाग्हीनं । दानं कांक्षति कः सुधीः ॥ कुंताग्रस्थसिताभ्रेणां—जनं किं स्याद् दृशोर्मुदे ॥ ८ ॥ भूपोऽवग् निष्कला युक्तं । माद्यंति कलया तव ॥ स्वयं कला-

केमके प्रायें करीने घणा माणसो उदरपूर्तिमाटे आवी चेष्टा करे छे. ॥ ४ ॥ वळी हे धीर! जो तारे धननुं प्रयोजन होय तो तुं तारी मरजीमुजब मागी ले, केमके अमो जैनो दयालु होवाथी कोइनी पण आशानो भंग करता नथी. ॥ ५ ॥ त्यारे अगलदत्त पण बोल्यो के शुं हुं भिक्षुक छुं? के तमारा पासेथी धन मागुं, केमके यशनी इच्छावाळा मानी माणसो धननी श्रेणिने तृणसमान गणे छे. ॥ ६ ॥ वळी मिष्ट वचन बोलवामां पण जेने कृपणता छे ते वळी शुं आपशे? केमके जे वृक्ष छाया पण देइ शकतुं नथी, तेनी पासेथी पंथीजनए फलनी आशा करवी फोकट छे. ॥ ७ ॥ अथवा मिष्ट वचनविना आपेलां दानने कयो सुबुद्धि माणस लेवानी इच्छा करे? केमके

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सु निष्णाताः । कथमस्मादृशाः पुनः ॥ ए ॥ किं तवाजीविकामात्र–कलया कलयानया ॥ ममो-
त्तमकलाभ्यासं । शृणु लोकद्वये हितं ॥ १० ॥

इहैव पुरि कौशांब्यां । हरिषेणोऽभवन्नृपः ॥ पद्मेव पद्मनाभस्य । प्रेयसी तस्य धारिणी ॥
॥ ११ ॥ सुबुद्धिः सचिवस्तस्य । मतिव्रततिमंडपः ॥ सिंहला स्नेहलालाप–सारणिस्तस्य वल्लभा ॥
॥ १२ ॥ आनंद स्वजनानंद—कारणं तनयस्तयोः ॥ सस्वजे प्राप्ततारुण्यो । व्याधिना त्वग्विरोधि

---

भालांनी अणीपर रहेला सुरमावडे आंखमां अंजन करवाथी शुं हर्ष थाय छे? ॥ ७ ॥ राजा बो-
ल्यो के तारी कलाथी कलाविनाना माणसो जे खुश थाय छे ते युक्तज छे, परंतु पोतेज कला-
ओमां निपुण एवा अमो केम खुशी थइये? ॥ ए ॥ फक्त आजीविकामाटे मनोहर एवी आ ता-
री कलावडे शुं थवानुं छे? बन्ने लोकोमां हितकारी एवो मारो उत्तम कलाभ्यास तुं सांभळ?॥१०॥

आज कोशांबी नगरीमां हरिषेण नामे राजा हतो, तेने विष्णुने जेम लक्ष्मी तेम धारिणी
नामे राणी हती. ॥ ११ ॥ ते राजाने बुद्धिरूपी वेलडीना मंडपसरखो सुबुद्धि नामे मंत्री हतो,
तथा ते मंत्रीनी स्नेहयुक्त वचनोनी नहेरसरखी सिंहला नामे स्त्री हती. ॥ १२ ॥ तेओने स्वजनो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ना ॥ १३ ॥ विवत्सुमत्र सततं । विज्ञाय व्याधिनायकं ॥ अशुश्रुवद्वपुस्तस्य । तद्भृत्यः स्वयथुः स्वयं ॥ १४ ॥ आविर्बभूव दौर्गंध्यं । तस्यांगे तत्प्रसृत्वरं ॥ न येन सविधे स्थातुं । कोऽपीष्टे मक्षिकां विना ॥ १५ ॥ चिरं चिकित्स्यमानोऽपि । नासौ नीरोगतां गतः ॥ बठरः पठ्यमानोऽपि । विनेयो वैदुषीमिव ॥ १६ ॥ गृहापवरकं नासौ । दुःसाध्यव्याधिबाधितः ॥ जहौ जराजर्जरितो । भोगीव तरुकोटरं ॥ १७ ॥ अन्यदा मंत्रिणः क्षोणी—नेतुः सदसि तस्थुषः ॥ जवनो यवनद्वीपा—

---

ने आनंद करनारो आनंद नामे पुत्र हतो, परंतु ज्यारे ते युवान थयो त्यारे तेना शरीरमां चामडीनो रोग दाखल थयो. ॥ १३ ॥ ते रोगना नायकने हमेशां तेना शरीरमां वसवानी इच्छावाळो जाणीने तेना नोकर सोजाए पोते तेनुं शरीर स्थूल करवा मांड्युं. ॥ १४ ॥ पछी ते रोगने लीधे तेना शरीरमां एवी दुर्गंधी विस्तार पामी के जेथी मक्षिकाविना कोइ पण तेनी पासे बेशी शकतुं नहि. ॥ १५ ॥ घणा काळसुधी तेने माटे औषधो कर्या परंतु भणतो एवो पण बुद्धिविनानो शिष्य जेम विद्वताने तेम ते नीरोगी थयो नहि. ॥ १६ ॥ अने तेथी घडपणथी निर्बल थयेलो सर्प जेम वृक्षनुं बिल तेम असाध्य व्याधिथी पीडित थयेला ते मंत्रिपुत्रे घरनो ओरडो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्धीमान् दूतः समाययौ ॥ १८ ॥ दूतः स्वस्वामिनः कार्यं । राज्ञे तस्मै निवेद्य सः ॥ उत्तस्थौ ल-
ब्धसन्मानः । सदसः सह मंत्रिणा ॥ १९ ॥ दूतं समग्रराजन्य—शुद्धिप्रापणलम्पकं ॥ चकार भूरि-
सत्कार-पात्रं मंत्री स्ववेश्मनि ॥ २० ॥ ददृशे तत्र दुर्गंध—देहो गेहोदरे स्थितः ॥ उत्थून इव
मंडूकः । कूपांतस्तेन मंत्रिसूः ॥ २१ ॥ कोऽयमंतः परो लक्ष-मक्षिकाहृदयंगमः ॥ इति पृष्टोऽमुना
मंत्री । प्रोचे बाष्पायतेक्षणः ॥ २२ ॥ किं वच्मि मंदभाग्योऽहं । यौवनेऽसौ ममांगजः ॥ फलस्य

---

ठेल्यो नहि ॥ १७ ॥ एक वखते ज्यारे मंत्री राजसभामां बेठो छे, तेवामां यवनद्वीपथी एक वे-
गवाळो बुद्धिवान दूत त्यां आव्यो. ॥ १८ ॥ ते दूत पोताना राजानुं कार्य ते राजाने कहीने त-
था आदरमान मेळवीने मंत्रीसहित सभामांथी उठ्यो. ॥ १९ ॥ सर्व राजाओनी खबरअंतर जा-
णनारा ते दूतने मंत्रीए पोताने घेर लेइ जइने तेनो घणो आदरसत्कार कर्यो. ॥ २० ॥ त्यां ते-
णे उरमामां रहेलो दुर्गंध शरीरवाळो ते मंत्रिपुत्र कुवामां रहेला देडकांनीपेठे उछळतो जोयो.
॥ २१ ॥ लाखो गमे माखोने प्रिय थइ पडेलो आ कोण छे? एम ते दूते पूछवाथी मंत्री आं-
खोमां आंसु लावी बोल्यो के, ॥ २२ ॥ शुं कहुं? हुं मंद भाग्यवाळो छुं, केमके फळसमये जेम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कान्ते शाखीव । प्लुष्टः कुष्टदवाग्निना ॥ २३ ॥ अहं वैद्यप्रतीकारा—नस्याऽनद्दपानचीकरं ॥ शशाम नाम नो तैस्तु । घृतैरिव धनंजयः ॥ २४ ॥ स दृष्टभूरिभूखंडः । पृष्टानेकबहुश्रुतः ॥ भक्तिक्रीतोऽभ्यधात्तस्य । सत्यप्रत्ययमौषधं ॥ २५ ॥ अयं जात्यकिशोरस्य । यदि क्षिप्येत शोणिते ॥ तत्त्वग्दोषेण मुच्येत । मलेनेव कृताप्लवः ॥ २६ ॥ इत्युदित्वा गते दूते । व्यमृशन्मंत्रिपुंगवः ॥ लेभे व्याधिप्रतीकार । एष ईषत्करो मया ॥ २७ ॥ पुत्रमित्रकलत्रेभ्यो–ऽप्यविश्वस्तेन भूभुजा ॥ यः किशो·

वृक्ष तेम यौवनवयमां आ मारो पुत्र कुष्टरूपी दावानलथी व्याप्त थयो छे. ॥ २३ ॥ में तेनामाटे वैद्योमारफते घणा उपायो कर्या, परंतु घृतथी जेम अग्नि तेम तेथी आनो रोग शांत थयो नहि. ॥ २४ ॥ जोएल छे घणो पृथ्वीभाग जेणे तथा पूछेल छे अनेक बहुश्रुतोने जेणे एवा ते दूते मंत्रीनी भक्तिथी खुश थइने तेने खरी खातरीनुं औषध बताव्युं के, ॥ २५ ॥ जो आ तारा पुत्रने जातिवंत घोडाना वछेरना रुधिरमां झबोळवामां आवे तो स्नान करनारनो जेम मेल तेम आनो आ कुष्ट रोग नाश पामे. ॥ २६ ॥ एम कहीने ते दूत गयाबाद मंत्रीए विचार्युं के, आ तो मने सहेलो रोगनो उपाय हाथ आव्यो छे. ॥ २७ ॥ पुत्र, मित्र अने स्त्रीनो पण विश्वास नहि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रो ममावासे । न्यासे मुक्तोऽस्ति सद्गुणः ॥ २८ ॥ रक्तधारास्ततः पुष्ट–शरीरादापगा इव ॥ नृय-
स्योऽप्युद्भविष्यंति । राज्यश्रीकेलिशैलतः ॥ २९ ॥ तासु स्नातो लघूल्लाघो । भविता मे कुमारकः
॥ पीनांगश्च किशोरोऽपि । वृष्ययोगाभियोगतः ॥ ३० ॥ मंत्रिणाथ किशोरस्य । शिरावेधो व्य-
धीयत ॥ प्रवहद्भिस्ततोऽसृग्भिः । क्षणात्कुंडमपूर्यत ॥ ३१ ॥ कौपं नालमिवोद्भिन्नं । मंत्रिणा धम-
नीमुखं ॥ यत्नतः संवृतमपि । न तस्थौ रुधिरं वमत् ॥ ३२ ॥ क्षणान्निश्च्योतितालक्त–पक्ष्मवत्पांडुतां

---

रखता एवा राजाए जे उत्तम लक्षणवाळो वछेरो मारे घेर थापण राख्यो छे, ॥ २८ ॥ राजलक्ष्मी-
ने क्रीडा करवाना पर्वतसरखा अने पुष्ट शरीरवाळा ते वछेरामांथी नदीनीपेठे रुधिरनी घणी धा-
रा निकळशे, ॥ २९ ॥ अने तेमां स्नान करवाथी मारो पुत्र तुरत निरोगी थशे, अने घा रुझा-
वनारी औषधी आदिकना प्रयोगथी ते वछेरो पण पाछो पुष्ट शरीरवाळो थशे. ॥ ३० ॥ पछी ते
मंत्रिए ते वछेरानी नाडी फोडी, अने तेमांथी निकळतां लोहीथी क्षणवारमां कुंडी भराइ गइ. ॥
॥ ३१ ॥ पछी खुल्ली थयेली कुवानी सरवाणीनीपेठे मंत्रीए तेनी नाडीनुं मुख जो के यत्नपूर्वक
बंध कर्युं, तो पण तेमांथी निकलतुं रुधिर बंध थयुं नहि. ॥ ३२ ॥ क्षणवारमां नीचोवी लीधेला

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गतः ॥ बालाश्वस्तत्यजे प्राणै—ररक्ते कोऽवतिष्ठते ॥ ३३ ॥ कोऽपि द्वेषी नरेंद्राय । तत्स्वरूपं न्यरूपयत ॥ खलैर्हि पूरितो लोको । मत्कुणैरिव मंचकः ॥ ३४ ॥ कल्पाग्निमिव कोपेन । नयन् हीनोपमां नृपः ॥ आरक्षै राक्षसक्रूरै—र्महामात्यमबंधयत् ॥ ३५ ॥ कषाया इव पुण्यौघं । गृहसारं विलुंट्य ते ॥ सकुटुंबं निजघ्नुस्तं । मारैर्नरकदारुणैः ॥ ३६ ॥ गुप्तगात्रो निलीयास्था—दानंदो रक्तकुंडके ॥ क्लीबः स्वं धीवरात्त्रातु—कामः कूर्म इवांभसि ॥ ३७ ॥ ततोऽपि निशि निर्गत्य । धौ-

उछळताना फोतरांनीपेठे फिक्को पडी गयेलो ते वछेरो प्राणरहित थयो, केमके अरक्तपासे कोण रहे? ॥ ३३ ॥ त्यारे कोइक द्वेषी माणसे राजाने ते वृत्तांत निवेदन कर्यो, केमके मांकडोथी जेम मांचो तेम आ जगत खलोथी भरेलुं छे. ॥ ३४ ॥ पछी कल्पांतकाळना अग्निनीपेठे कोपथी नीचनी उपमाने प्राप्त थयेला राजाए राक्षससरखा निर्दय पोलीसमारफते ते महामंत्रीने बंधाव्यो. ॥ ३५ ॥ पछी कषायो जेम पुण्यना समुहने तेम तेओए तेना घरनी सर्व मिल्कत लुंटीने नरकसरखा भयंकर मारथी तेने कुटुंबसहित मारी नाख्यो. ॥ ३६ ॥ ते वखते ते असमर्थ आनंद मछीमारथी बचवानी इच्छावाळो काचबो जेम जलमां तेम रुधिरनी कुंडीमां पोताना अंगोपांग गो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तांगः क्वापि वारिणि ॥ स्वमालोकत सद्भायं । निर्मोकमिव पन्नगं ॥ ३८ ॥ केनाप्यलक्षितः पर्ण-
वाटं निश्येव सोऽगमत् ॥ तत्स्वामिना च कल्याण । कोऽसि त्वमिति जाषितः ॥ ३९ ॥ दीनास्ये-
नादितः स्वीयो-दंते तेन निवेदिते ॥ कृपालुर्मंत्रिपुत्रं स । रहः स्वगृहमानयत ॥ ४० ॥ सुपर्णा-
दुरगः सिंहा—न्मृगश्चौरादिवाध्वगः ॥ गुप्तचारी नृपाद्भीत—स्तस्थौ तत्र सुखेन सः ॥ ४१ ॥ पु-

---

पवीने बुपाइ रह्यो हतो. ॥ ३७ ॥ पछी रात्रिए तेमांथी निकलीने क्यांक जळमां पोतानुं शरीर
धोयाबाद ते पोताने कांचळीविनाना सर्पनीपेठे नीरोगी शरीरवालो जोवा लाग्यो. ॥ ३८ ॥ पछी
त्यांथी कोइनी नजरे पड्याविना गुप्त रीते रात्रिनी अंदरज ते एक खलावाममां गयो, त्यारे ते
खलावामना मालिके तेने पूछ्युं के हे कल्याण! तुं कोण छे? ॥ ३९ ॥ त्यारे तेणे पण दयाम-
णे चहेरे पोतानो वृत्तांत पहेलेथी तेनी आगल निवेदन कर्यो, त्यारे ते दया लावीने ते मंत्रि-
पुत्रने गुप्त रीते पोताने घेर तेडी लाव्यो. ॥ ४० ॥ गरुडथी जेम सर्प, सिंहथी जेम हरिण तथा
चोरथी जेम पंथी तेम राजाथी डरेलो ते मंत्रिपुत्र त्यां सुखेथी गुप्तपणे रह्यो. ॥ ४१ ॥ हवे ए-
क दिवसे पवित्र शरीरवाळा, धर्मरूपी रथनी धुरासरखा, दुर्गतिमां जवाने अटकाववामाटे मजबूत

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust

एयांगावन्यदा धर्म—रथस्यैकधुराविव ॥ प्रवेशं दुर्गतौ वातुं । सुश्लिष्टावररी इव ॥ ४२ ॥ अलिप्तौ पापपूरेण । संसृतेः पुलिनाविव ॥ साधू सत्तपसाधूत—मोहौ तद्गृहमीयतुः ॥ ४३ ॥ युग्मं ॥ भृंगयन्नुत्तमांगं स्वं । मंत्रिसूस्तत्पदांबुजे ॥ किं वत्स विमनस्कोऽसि । मुनिभ्यामित्यभाष्यत ॥ ४४ ॥ उदश्रुणाखिन्ने मूला—न्निजदुःखेऽमुनोदिते ॥ अयब्रूतां यती धर्म–शिक्षां दुःखांतकारिणीं ॥४५॥ माधुर्यं लवणे सारं । रंभायां सुस्वरः खरे ॥ पावित्र्यं वर्चसो गेहे । स्वादु पानीयमूषरे ॥ ४६ ॥

---

जोगळसरखा, ॥ ४२ ॥ पापोना समुद्रथी नहि लेपायेला, संसारना किनाराजेवा तथा उत्तम तपथी मोहने नाश करनारा एवा बे साधुउ तेने घेर आव्या. ॥ ४३ ॥ त्यारे ते मंत्रिपुत्र ते मुनिना चरणकमलप्रते पोताना मस्तकने भ्रमररूप करवा लाग्यो, त्यारे तेउए तेने पूछ्युं के हे वत्स! तुं उदास मनवालो केम देखाय छे? ॥ ४४ ॥ त्यारे तेणे आंखोमां आंसु लावीने मूळथी पोतानुं दुःख कही संजलाव्युं, त्यारे ते मुनिउए तेने दुःखनो नाश करनारो धर्मोपदेश आप्यो के, ॥ ४५ ॥ जेम लवणमां मीठाश, केळमां कठिनता, खरमां सुस्वर, चमारना घरमां पवित्रता, खारी जमीनमां मीठुं पाणी, ॥ ४६ ॥ राखमां चीकाश, मषीमां सफेदाइ तथा अग्निमां जेम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्नेहो भस्मनि वैशद्यं । मष्यां शैत्यमिवानले ॥ सौम्य क्वापि सुखं नास्ति । व्यापकापद्भरे भवे ॥ ॥ ४७ ॥ ये संयोगास्तनुमता—माद्यमुन्मादकारणं ॥ तेषां निष्ठावियोगो हि । व्यापाराणां विपद्यते ॥ ४८ ॥ यत्सर्वबंधुसंहारा—दारात्त्वग्मात्रसारता ॥ तस्य चिंतय वैरस्यं । स्वदेहस्यायतौ ध्रुवं ॥ ॥ ४९ ॥ दिनानामिव जंतूनां । वृद्धिर्हानिश्च निश्चिता ॥ आसात्तिं विप्रकृष्टिं च । याति पुण्यविवस्वति ॥ ५० ॥ कैः कैर्युक्तो विभक्तो वा । भवेद्देही न देहिभिः ॥ पुलिंद इव चिन्वानः । फलानि तरुभिर्वने ॥ ५१ ॥ तत्त्यक्त्वा स्वजनव्रात—मनैकांतिकमध्रुवं ॥ आत्यंतिकं ध्रुवं धर्म—मेवैकं

---

शीतलता नथी तेम हे सौम्य! दुःखथी भरेला आ संसारमां क्यांय पण सुख नथी. ॥ ४७ ॥ प्राणीओने जे संयोगो प्रथम हर्ष करनारा थाय छे, ते व्यापारोनो खरेखर निश्चयथी वियोग थाय छे. ॥ ४८ ॥ वळी तुं विचार के जे सर्व स्वजनोना नाशथी फक्त तारुं शरीर शोभीतुं थयुं छे, ते तारुं शरीर भविष्यकाळमां खरेखर नाश पामशे. ॥ ४९ ॥ पुण्यरूपी सूर्य उगते तथा आथमते छते दिवसोनी पेठे प्राणिओनी वृद्धि अने हानि निश्चित थयेली छे. ॥ ५० ॥ वननी अंदर फळ एकठां करतो भिल्ल जेम वृक्षो साथे तेम आ संसारमां प्राणी कया कया प्राणिओ साथे संयोग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वजनीकुरु ॥ ५२ ॥

स द्विधा श्रमणश्राद्ध—व्रतभेदाज्जिनैः स्मृतः ॥ तत्राद्यो ध्रियते धीरै—र्जीवैः क्लीबैस्तथेतरः ॥ ५३ ॥ आनंदः स्फुरदानंद–मंदीभूतमनोऽव्यथः ॥ अथ तत्प्रथमं भेजे । श्राद्धधर्मं स धीरधीः ॥ ॥ ५४ ॥ बद्धमर्त्यभवायुष्कः । पूर्वं भद्रकभावतः ॥ पश्चात्प्रपालितश्राद्ध—धर्मः काले व्यपादि सः ॥ ५५ ॥ पुरेऽत्र हरिषेणस्य । राज्ञः सोऽहं सुतोऽभवं ॥ जितशत्रुरिति ख्यातः । पुण्यैः किं नाम

---

वियोगवाळो नथी थतो? ॥ ५१ ॥ माटे अनेकांत अने चपळ एवा स्वजनोना समुहने छोडीने फक्त एक आत्यंतिक अने निश्चल एवा धर्मनेज पोताना स्वजनरूप कर? ॥ ५२ ॥

ते धर्म साधु अने श्रावकना व्रतना भेदथी बे प्रकारनो जिनेश्वरोए कहेलो छे, तेमां पहेलो धीर मनुष्यो तथा बीजो कायर मनुष्यो धारण करे छे. ॥ ५३ ॥ हवे आनंद थवाथी मंद थयेल छे मननुं दुःख जेनुं एवा ते बुद्धिवान आनंदे प्रथम श्रावकधर्म अंगीकार कर्यो. ॥ ५४ ॥ पूर्वे भद्रकपरिणामथी मनुष्यभवनुं आयुष्य बांधीने पाछलथी श्रावकधर्म पाळीने केटलेक काळे ते मरण पाम्यो. ॥ ५५ ॥ ते आनंदनो जीव आ हुं आ नगरमां हरिषेण राजानो जितशत्रु नामनो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुर्घटं ॥ ५६ ॥ दृष्ट्वान्यदा मुनिद्वंद्वं । मध्येपुरविचारिणं ॥ गवाक्षगोऽहम्व्यूढ—मोहः प्राग्भवम-
स्मरं ॥ ५७ ॥ तदादि हृदि मन्येऽहं । कलासु सकलास्वपि ॥ वल्लीषु कल्पवल्लीव—देकां पुण्यकलां
कलां ॥ ५८ ॥ वास्तुविद्योर्णनाभेषु । सुगृहासु च साग्रहा ॥ हंसे गतं वचः कीरे । नीरे च तर-
णं तिमौ ॥ ५९ ॥ हुडे युद्धज्ञता काल—ज्ञानं च खरकुर्कुटे ॥ प्रचलाकिनि नृत्यं च । पंचमोद्गा-
रिता पिके ॥ ६० ॥ एवं कला किल क्वापि । क्वापि दृष्टा पशुष्वपि ॥ न पुनः सफलं पुण्यं । वि-

---

पुत्र थयो छुं, केमके पुण्यथी शुं प्राप्त थतुं नथी? ॥ ५६ ॥ एक दिवसे नगरनी अंदर विचरतुं मुनिनुं जोडलुं जोइने गवाक्षमां बेठेलो हुं मोह दूर थवाथी पूर्वभवने याद करवा लाग्यो. ॥५७॥ अने त्यारथी हुं मारा मनमां एम मानुं छुं के वेलडीओमां जेम कल्पवेली तेम सघली कलाओ-मां एक पुण्यकलाज श्रेष्ठ छे. ॥ ५८ ॥ करोळीयामां जेम वास्तुविद्या, सुघरीओमां विशेष प्रकारनी ते विद्या, हंसमां गति, पोपटमां वचन, मत्स्यमां जल तरवानी कळा ॥ ५९ ॥ तेतरमां युद्धज्ञान, खर तथा कुकडामां काळज्ञान, मयूरमां नृत्य तथा कोकिलमां पंचमराग, ॥ ६० ॥ एवी रीते को-इ कोइ पशुमां पण कोक कोक कला जोवामां आवे छे, परंतु पुण्यविना लक्ष्मी, सुख के कीर्ति

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ना श्रीसुखकीर्त्तयः ॥ ६१ ॥ त्रिभिर्विशेषकं ॥ शिरःशून्याः कलाः सर्वा । एकां धर्मकलां विना ॥
ततो वीर प्रशंसंति । संतस्तामेव केवलं ॥ ६२ ॥ एवं राज्ञि वदत्येव । नागरा दुःखसागराः ॥ समं
समाजमाजग्मुः । सारोपायनपाणयः ॥ ६३ ॥ विज्ञं विज्ञपयामासु–स्ते नत्वा नरनायकं ॥ त्वां या-
चंते प्रभो स्थानं । पौराश्चौरार्त्तिवर्जितं ॥ ६४ ॥ आत्मनीव सचैतन्ये । त्वयि मध्यस्थितेऽप्यहो ॥
लुप्तमेतत्पुरं चौर–चरटैः करटैरिव ॥ ६५ ॥ आरंभभीरव इव । स्तेनास्ते नाथ पत्तने । स्वभावसि-

सफल थतां नथी. ॥ ६१ ॥ एक धर्मकलाविना सघळी कलाउ मस्तकरहित छे, माटे हे वीर! सं-
त पुरुषो केवल ते धर्मकलानेज वखाणे छे. ॥ ६२ ॥ जेवामां राजा एम बोले छे तेवामां अत्यंत
दुःखी थयेला नगरना लोको एकठा थइने हाथमां मनोहर भेटणासहित राजसभामां आव्या,॥
॥ ६३ ॥ तथा ते विद्वान राजाने नमीने विनंति करवा लाग्या के हे स्वामी! नगरना लोको आ-
पनीपासे चोरना उपद्रवविनाना स्थाननी मागणी करे छे. ॥ ६४ ॥ चेतनाशक्तिवाळा आत्मानी-
पेठे आप अंदर रह्या छतां पण नास्तिकोसरखा चोरोए आ नगर लुंटीने विनष्ट कर्युं छे. ॥ ६५ ॥
वळी हे स्वामी! आपना आ नगरमां जाणे आरंभथी डरता होय नहि तेम ते चोरो अमारी तै-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ध्यान् गृह्णंति । दारांश्च विज्ञवांश्च नः ॥ ६६ ॥ क्रूरचौरकृतैश्छिद्रैः । सांप्रतं सदनेषु नः ॥ प्रवेश-
निर्गमौ जातौ । सुकरौ सर्पसंपदां ॥ ६७ ॥ अंगसंगतभूषायै । स्तेनैर्नस्तनया अपि ॥ वध्यंते हंत-
कस्तूरी—कृते गंधमृगा इव ॥ ६८ ॥ तथा तव पुरे चौरा । विलसंतिस्म निर्भरं ॥ यथा दैगंबरी
दीक्षा । न चिराद्भाविनी नृणां ॥ ६९ ॥ या मंडनं मुमुक्षूणा—मपरिग्रहता मता ॥ अनिच्छूनाम-
पि स्तेनैः । सा नः संप्रति ढौकिता ॥ ७० ॥ सद्मान्यासन्नसद्मानी—ति सोढं देव नागरैः ॥ म-

---

यार स्त्रीजनने तथा धनने लेइ जाय छे. ॥ ६६ ॥ वळी अमारां घरोमां हमणां ते क्रूर चोरोए क-
रेलां छिद्रोथी सर्पोने आववानुं तथा लक्ष्मीने जावानुं सहेलुं थइ पडेलुं छे. ॥ ६७ ॥ वळी कस्तू-
रीमाटे जेम हरिणोने तेम शरीरपर पहेरेलां आभूषणोमाटे ते चोरो अमारां संतानोने पण मा-
री नाखे छे. ॥ ६८ ॥ आपना आ नगरमां ते चोरो एवी तो चालाकी वापरी रह्या छे के जेथी
माणसोने हवे थोडा समयमांज दिगंबरी दीक्षा प्राप्त थशे. ॥ ६९ ॥ जे अपरिग्रहपणुं मुमुक्षु सा-
धुजनने शोभावनारुं छे, ते अपरिग्रहपणुं नहि इच्छता एवा पण अमोने हालमां ते चोरोए आपे-
लुं छे. ॥ ७० ॥ हे स्वामी! घरो जे ऋद्धिरहित थयां ते तो अमोए सहन कर्युं, परंतु मनुष्योनी

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

र्यद्धानिस्त्विहाऽनिष्टा । दृष्टा पूत्कुर्महे ततः ॥ ७१ ॥ तत श्रुत्वा पृथिवीपालो । भीष्मभालोऽन्यधा-त्क्रुधा ॥ रे रे दक्षास्तलारक्षाः । केयं भो वः प्रमत्तता ॥ ७२ ॥ भवत्सु दीप्यमानेषु । दिवाकरक-रेष्विव ॥ क्रूरचौरतमःपूरः । पौरलोकं रुणद्धि किं ॥ ७३ ॥ दत्ताः सप्ताहमध्ये त—दानयध्वं मलि-म्लुचान् ॥ यूयमेवाथवा चौराः । किं चौराणां खनिः पृथक् ॥ ७४ ॥ इति राज्ञोदिते सर्वे । ते त-त्रार्थे निरौजसः ॥ अधःपुष्पाः पुष्पिणीव । बभूवुर्न्यग्मुखा ह्रिया ॥ ७५ ॥ अथाप्तावसरः प्रोचे—

---

जे हानि थाय छे ते अमोने दुःखदायक देखाय छे, अने तेथी अमो आपनीपासे पोकार करी-ये छीये. ॥ ७१ ॥ ते सांभळीने क्रोधथी भयंकर ललाटवाळो राजा बोल्यो के अरे हुशियार पो-लीस अमलदारो! आ तमारी गफलती ते केवी? ॥ ७२ ॥ सूर्यना किरणोसरखा तमो देदीप्य-मान होवा छतां पण क्रूर चोरोरूपी अंधकारनो समुह नगरना लोकोने केम हेरान करे छे? ॥ ॥ ७३ ॥ माटे तमो सावधान रहीने सात दिवसनी अंदर ते चोरोने लावो? अथवा तमोज चो-रो ठरशो, केमके चोरोनी शुं कइ जुदी खाण होय छे? ॥ ७४ ॥ राजाए एम कहेवाथी ते कार्य करवामां असमर्थ एवा ते पोलीस अमलदारो नीचां पुष्पोवाळां वृक्षोनीपेठे लज्जाथी नीचा मुख-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽगलदत्तो नरेश्वरं ॥ ह्रीभारनतमूर्धानो । विमुच्यंताममी भटो ॥ ७६ ॥ यद्यादिशसि नूनेत—
श्चेतसा प्रगुणेन मां ॥ तदाहमंतः सप्ताह—मानये चौरनायकं ॥ ७७ ॥ दुःकरं सुकरं वेति । न
चिंता दिप्ततेजसां ॥ विद्युद्गोलः पतन्नद्रौ । तृणे वा न हि भिन्नधीः ॥ ७८ ॥

अथ प्राप्य नृपादेशं । चौरप्राप्तिपरायणः ॥ गंजाप्रपापुरद्यूत—सत्रशालासु सोऽभ्रमत ॥७९॥
ये दर्शं दर्शं जनव्रातं । साचीकृतविलोचनः ॥ ईक्षांचक्रे चिरं चौर—लक्षणानि विचक्षणः ॥ ८० ॥

---

वाळा थया. ॥ ७५ ॥ हवे ते समये अवसर मलवाथी अगलदत्ते राजाने कह्युं के हे स्वामी! ल-
ज्जाना भारथी नमेलां मस्तकवाळा आ पोलीस अमलदारोने आ कार्यथी मुक्त करो? ॥ ७६ ॥
वळी हे स्वामी! जो आप खरा दिलथी मने फरमावो तो हुं ते चोरोना नायकने सात दिवसनी
अंदर लावी आपुं. ॥ ७७ ॥ आ कठीन छे के सहेलुं छे, एवी चिंता महापराक्रमीजनने होती न-
थी, केमके पर्वत अथवा घासपर पडता वीजळीना गोळानो कइं जुदो प्रकार होतो नथी. ॥७८॥

हवे राजानुं फरमान मेलवीने चोरनी शोधमाटे तैयार थयेलो ते अगलदत्त मदिराशाला,
परब, नगरमां रहेलां जुगारखानां तथा सदाव्रतना स्थानोमां भमवा लाग्यो. ॥ ७९ ॥ वळी तीरछी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भौतिका भागवता—श्चरका लिंगिनस्तथा ॥ कापालिकाः कार्पटिकाः । सोऽजूत्तेषु विशेषदृक् ॥
॥ ८१ ॥ चौरं पश्यन्ननालस्य—मतीये षम् दिनानि सः ॥ न तु तं प्राप संताप—पूरितश्चेत्यचिंतय-
त ॥ ८२ ॥ एकतो भूपतेरग्रे । प्रतिज्ञातं सुदुष्करं ॥ अन्यतस्त्वरितं यांति । जंघाला इव वासराः
॥ ८३ ॥ चौरश्चेन्नप्स्यते नासौ । नव्यं चौरेण तन्मया ॥ जनदृग्परिहारार्थं । दिवागतिनिषेधतः
॥ ८४ ॥ गंतव्यं वा विदेशेषु । वस्तव्यं वा वने क्वचित् ॥ न तूत्सृष्टप्रतिज्ञेन । स्थेयमत्र पुरे म-

आंखोथी लोकोना समुहने जोतो जोतो ते हुशियार अगलदत्त घणा वखतसुधी चोरना लक्षणो
जोवा लाग्यो. ॥ ८० ॥ वळी ते भौतिक, भागवत, चरक, लिंगी, कापालिक तथा कापडीजने
विशेष प्रकारे जोवा लाग्यो. ॥ ८१ ॥ एवी रीते खूब हुशियारीथी चोरनी तपास करतां छ दिव-
सो तो व्यतीत थया, परंतु चोर न मलवाथी ते खेदित थइने विचारवा लाग्यो के, ॥ ८२ ॥
एक तो राजानीपासे जेमाटे प्रतिज्ञा करी छे ते कार्य दुष्कर छे, अने बीजी बाजु दिवसो एकदम
उतावळथी चाल्या जाय छे. ॥ ८३ ॥ वळी जो आ चोर नहि मले तो माणसोनी नजर चूकाव-
वामाटे दिवसे गमन नहि करवाथी मारेज चोर थवुं पडशे. ॥ ८४ ॥ अथवा परदेशमां जवुं प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

या ॥ ८५ ॥ एवं चिंतासरिद्वीचि—वर्द्धितस्वांतचापलः ॥ सप्तमेऽह्नि विकालेऽसौ । निरगान्नगराद् बहिः ॥ ८६ ॥ स्थितः स तस्करं लिप्सु—र्मलपीवरचीवरः ॥ मरुचलद्दलश्रेणे—स्तत्र चूततरोस्तले ॥ ८७ ॥ वामहस्तस्फुरद्दंडो । वांछन्निव यमोपमां ॥ दंडोर्ध्वे चीरिकां बिभ्र—द्ध्वजवद्दुरितौकसि ॥ ८८ ॥ जपमालापरावर्त्तं । कुर्वन् दक्षिणपाणिना ॥ अमुष्यंत क्षितौ हंत । कतीति गणयन्निव ॥ ॥ ८९ ॥ बध्धुं नरतिमीन् जाल—मिव कंथां वहन् गले ॥ अव्यक्तं चालयन्नोष्ठौ । चौर्यविद्यां ज-

---

डशे, अथवा तो कोइ वनमां जइ वसवुं पडशे, केमके प्रतिज्ञाभंग थवाथी माराथी अहीं रही शकाशे नहि. ॥ ८५ ॥ एवी रीते चिंतारूपी नदीना मोजांथी वृद्धि पामेल छे हृदयनी चपलता जेनी एवो ते अगलदत्त सातमे दिवसे संध्याकाळे नगरनी बहार गयो. ॥ ८६ ॥ त्यां ते मलयुक्त कपडां पहेरीने पवनथी चालती छे पांदडांनी श्रेणि जेनी एवा एक आंबाना वृक्षनीचे चोरने मेळववानी इच्छाथी बेठो. ॥ ८७ ॥ एवामां तेणे जाणे यमनी उपमा इच्छतो होय नहि तेम डाबा हाथमां पकडेला दंडवाळो, अने पापना घरपर रहेली धजानीपेठे दंडपर लटकेलां चींथरांवाळो, ॥ ८८ ॥ अरे आ पृथ्वीपर में केटलाने लुंट्या छे? एम जाणे गणतो होय नहि तेम ज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पन्निव ॥ ७० ॥ भून्यस्तनयनो मार्गं । दुर्गतेः स्पृहयन्निव ॥ परिव्राम् ददृशे तेना—ऽऽगच्छन् जीर्णवनात्तदा ॥ ७१ ॥ चतुर्भिः कलापकं ॥ उद्बद्धपिंडिकं दीर्घ—जंघमारक्तलोचनं ॥ स्तब्धकेशं वक्रनाशं । निश्चिक्ये तं स तस्करं ॥ ७२ ॥ सोऽपि स्वोपधिमालंब्य । शाखायां तस्य शाखिनः ॥ निविष्टो विष्टरीकृत्य । च्युतपत्राणि भूतले ॥ ७३ ॥ भग्नपोतमिव क्षीण—सर्वस्वमिव दुःखिनं ॥ नि-

मणे हाथे जपमाला फेरवतो, ॥ ८९ ॥ मनुष्यरूपी मत्स्योने बांधवानी जाणे जाळ होय नहि तेवी कंथाने गळामां धारण करनारो, तथा जाणे चोरी करवानी विद्या जपतो होय नहि तेम शब्दविना होठ फफडावतो, ॥ ७० ॥ तथा अधोगतिनो मार्ग चहातो होय नहि तेम जमीनपर दृष्टि राखनारो एवो एक परिव्राजक जोगी तेणे जीर्णवनमांथी आवतो जोयो. ॥ ७१ ॥ उंची पेनीवाळो, लांबी जंघावालो, लाल आंखोवालो, स्तब्ध केशोवालो तथा वांका नाकवालो एवो तेने आवतो जोइने अगलदत्ते निश्चय कर्यो के खरेखर आ चोर छे. ॥ ७२ ॥ पछी ते परिव्राजक पोतानां उपकरण ते वृक्षनी माळमां टांगीने पृथ्वीपर पडेलां पांदडांनुं आसन बिछावीने तेपर बेठो. ॥ ७३ ॥ जाणे वहाण भांगी जवाथी समुद्र तरीने निकळ्यो होय नहि एवा, तथा पोतानी

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रीदृयाऽगलदत्तं सो—ऽवतंसो मायिनां जगौ ॥ ९४ ॥ वत्स विज्ञायतेयं ते । व्यक्तं वक्ति दरिद्रत
॥ तदाशु वद विश्वस्तः । कस्त्वं कौतस्कुतोऽसि वा ॥ ९५ ॥ जगादागलदत्तोऽथ । पटुः कपटनाट-
के ॥ ब्रूते परमकारुण्यं । प्रश्नो प्रश्नोऽयमेव ते ॥ ९६ ॥ अहमुज्जयिनीवासी । बाल्योच्छिन्नपरिच्छ-
दः ॥ सर्वात्मना श्रिया त्यक्तः । कुलपुत्रोऽस्मि दुर्भगः ॥ ९७ ॥ लग्नदारिद्र्यदावत्वा—दव्यवस्थं भु-
वि भ्रमन् ॥ न्यग्नालयमिहायात—स्त्वां कारुण्यैकसागरं ॥ ९८ ॥ निश्चितं त्वयि निध्याते । दारिद्र्यं

---

सर्व मिल्कत जाणे नाश पामी होय नहि एवा ते दुःखी अगलदत्तने जोइने ते कपटीनो शिरो-
मणि बोल्यो के, ॥ ९४ ॥ हे वत्स! आ तारो दयामणो चहेरो प्रगटरीते तारुं दरिद्रपणुं सूचवे
छे, माटे तुं मारापर भरुसो राखीने जलदी कहे के तुं कोण अने क्यांनो रहेवासी छे? ॥ ९५ ॥
त्यारे कपटनाटकमां चतुर एवो ते अगलदत्त बोल्यो के हे भगवन्! आपनो आ प्रश्नज आपनुं
अति दयालुपणुं सूचवे छे. ॥ ९६ ॥ हुं उज्जयिनी नगरीनो रहेवासी छुं, मारी बाल्यावस्थामांज
मारो सर्व परिवार नाश पाम्यो छे, तेमज हुं बिलकुल धनविनानो अने दुर्भागी कुलीननो पुत्र
छुं. ॥ ९७ ॥ दारिद्र्यरूपी दावानल मारी पाछल लाग्याथी हुं कइं पण ठरठेकाणाविना आ पृथ्वी-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

शांतमेव मे ॥ शाम्यत्येव पयोराशिः । कुंभजन्मन्युदित्वरे ॥ ९९ ॥ द्रागथो लिंगिनालिंगि । सौ-
म्य सम्यग् वदन्नसि ॥ मयि प्रसन्ने सन्नेव । भावि तेऽतिघनं धनं ॥ १८०० ॥ एवं तयोर्निगदतोः ।
कालरूपेन भास्करः ॥ अयं हि तारकश्रीणां । हर्तेत्यस्तमनीयत ॥ १ ॥ गते सूरे जगज्जग्धुं ।
परितः प्रवितस्तरे ॥ असज्जनजनस्वांत–मलीमसतमं तमः ॥ २ ॥ कंथाकोणादथाकृष्या—युधानि

पर भम्या करुं छुं, एवामां अहीं दयाना सागर एवा आपनां मने दर्शन थयां छे. ॥ ९८ ॥ ख-
देशांतरप्रते चाल्यो. ॥ ८७ ॥ समुद्रथी वृद्धि पामेल लक्ष्मीवाळा सुराष्ट्रदेशमां ते गयो, तथा त्यां गिरिपुरमां लांबो वखत रहीने घणो व्यापार करवा लाग्यो. ॥ ८८ ॥ त्यां तेने एक धन नामना शेठसाथे मित्राइ थइ, के जे मित्राइ कस्तूरीनी सुगंधीनीपेठे कदापि पण कमी थइ नहि. ॥ ॥ ८० ॥ पछी भव्य माणस मनुष्यभवमांथी जेम पुण्यने तेम ते घणुं धन मेलवीने त्यांथी ज्यारे ते पाछो वळ्यो त्यारे तेणे ते धनश्रेष्ठिने प्रीतिरूपी वेलने वरसादसरखुं वचन कह्युं के, ॥८१॥ अहीं एक जगोए रहेता एवा आपण बन्नेनी प्रीति तो सारी रीते चाली छे, परंतु हे मित्र! हवे आपण बन्ने ज्यारे जूदा पडशुं त्यारे ते प्रीति शीरीते टकी शकशे? ॥ ८२ ॥ परंतु जो आ प्री-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदाश्नुवीत स्थेमान—मालानस्थेव हस्तिनी ॥ ७३ ॥ अनीकिनीव कामस्य । कनीयं यत्त्वया धन ॥ धनश्रीर्मे तनूजेन । समुद्रेण विवाह्यतां ॥ ७४ ॥ शल्योद्धारमिवामंस्त । मुदितस्तद्वचो धनः ॥ को नानुमन्यते योगं । माणिक्यस्वर्णमुद्रयोः ॥ ७५ ॥ सागरोऽभिदधे तर्हि । मया गृहगतेन सः ॥ किंचित्कार्यमिषं कृत्वा । समित्रोऽत्र प्रहिष्यते ॥ ७६ ॥ आतिथ्यदंभादाकार्य । विवाह्यः स रह-स्त्वया ॥ यत्सोऽस्ति कातरः शस्त्री—ष्विव स्त्रीषु पराङ्मुखः ॥ ७७ ॥

---

ति आपणा संतानोना संबंधरूपी बंधनवाळी थाय, तो स्तंभमां बांधेली हाथणीनीपेठे ते स्थिर थाय. ॥ ७३ ॥ माटे कामदेवनी सेनासरखी तारी धनश्री नामनी पुत्रीने मारा समुद्रदत्त नामना पुत्रनी साथे परणाव? ॥ ७४ ॥ त्यारे जाणे पोतानुं शल्य निकळी गयुं होय नहि तेम खुशी थइने धनश्रेष्ठीए तेनुं वचन स्वीकार्युं, केमके माणिक्य अने स्वर्णनी वींटीनो संयोग कोण सारो माने नहि? ॥ ७५ ॥ पछी सागरदत्त बोल्यो के त्यारे हवे हुं घेर जइने कइंक कार्यना मिषथी हुं ते मारा पुत्रने अहीं तेना मित्रो सहित मोकलीश. ॥ ७६ ॥ परोणागतना मिषथी तारे तेने बोलावीने गुप्त रीते परणावी देवो, केमके ते शस्त्रोथी जेम तेम स्त्रीओथी कायर थयेलो छे. ॥ ७७ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

इति निःशेषतः शिक्षा—सावधाने धने स्थिते ॥ ययावुज्जयिनीं श्रेष्टी । प्रयाणैरविलंबितैः ॥ ९८ ॥ स तत्रोत्कंठयायातैः । स्वजनैर्जातसंगमः ॥ व्याजज्ञो व्याजहारेति । पुत्रं द्वित्रिदिनात्यये ॥ ९९ ॥ अहं गिरिपुरे किंचि—न्मुक्त्वा पण्यमिहागमं ॥ विक्रीणंते विना लाभं । वस्तु जातु न वाणिजः ॥ ११०० ॥ तद्विक्रेतुं व्रजांस्तत्र । वत्स गछत्वतुछधीः ॥ संप्रति प्राप्तकालो य—द्वस्तुनस्तस्य विक्रयः ॥ १ ॥ समुद्रः पितुरादेशा—दचलद्भक्तिनिश्चलः ॥ श्रेष्टिज्ञापितवीवाह—वृत्तैर्मित्रैः प-

---

एवी रीते सर्व शिक्षाथी ते धनश्रेष्टी सावधान रह्ये छते सागरदत्त शेठ विलंबरहित प्रयाणोथी उज्जयिनीमां गयो. ॥ ९८ ॥ त्यां ते उत्कंठाथी आवेला स्वजनो साथे मळ्यो, पछी बे त्रण दिवसो गयाबाद मिषना जाणनारा ते शेठे पुत्रने कह्युं के, ॥ ९९ ॥ हुं गिरिपुरमां थोडुंक करीयाणुं बाकी मेलीने आवेलो छुं, केमके व्यापारीओ लाभविना वस्तु कदापि पण वेचता नथी. ॥ ११०० ॥ माटे हे वत्स! ते वस्तु वेचवामाटे उत्तम बुद्धिवाळो तुं त्यां जा? केमके हवे ते वस्तु वेचवानो अवसर छे. ॥ १ ॥ पछी शेठे जणावेल छे विवाहनुं वृत्तांत जेओने एवा मित्रोसहित भक्तिमां निश्चल समुद्रदत्त पिताना हुकमथी त्यांथी चाल्यो. ॥ २ ॥ पछी मधुर अवाजवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिस्कृतः ॥ २ ॥ क्रमाद्गिरिपुरं प्राप्तो । मित्रैरूचे धनाय सः ॥ वसंतो वनमायातो । मृदुध्वानैः पि-
कैरिव ॥३॥ कृत्वा विवाहसामग्रीं । प्रपंचचतुरो धनः ॥ न्यमंत्रयत तं भोक्तुं । समित्रं स्वगृहे नि-
शि ॥ ४ ॥ धनांगजा त्रियामाया—मायातं स्वसुहृद्युतं ॥ वीक्ष्याऽहृष्यच्चकोरीव । मृगांकमुडुमध्यगं
॥ ५ ॥ भोजयामास तं भक्त्या । रंजयामास सद्गिरा ॥ धनः सागरजातत्वा—ज्जीवितादपि वल्लभं
॥ ६ ॥ भुक्तोत्थितो धनेनासौ । बलात्पुत्रीं व्यवाह्यत ॥ असंस्तुतत्वात्तद्वाचं । व्यावर्त्तयितुमक्षमः ॥

---

ळी कोयलो जेम वनमां आवेला वसंत ऋतुने जणावे छे, तेम मित्रोए धनश्रेष्ठिप्रते तेने अनु-
क्रमे गिरिपुरमां आवेलो जणाव्यो. ॥ ३ ॥ त्यारे प्रपंचमां हुशियार धनश्रेष्ठिए विवाहनी सामग्री
करीने तेने रात्रिए भोजनमाटे मित्रसहित पोताने घेर बोलाव्यो. ॥ ४ ॥ त्यारे पोताना मित्रस-
हित रात्रिए आवेला तेने जोइने धनश्रेष्ठीनी पुत्री ताराउ वच्चे रहेला चंद्रने जोइने चकोरीनी
पेठे खुशी थइ. ॥ ५ ॥ पछी धनश्रेष्ठीए सागरदत्तनो पुत्र होवाथी जीवितथी पण वल्लभ एवा ते
समुद्रदत्तने भक्तिथी जमाड्यो, तथा उत्तम वचनथी खुशी कर्यो. ॥ ६ ॥ जमीने उठ्याबाद ध-
नशेठे बलात्कारे तेने पोतानी पुत्री परणावी, परिचय न होवाथी तेनुं वचन ते फेरवी शक्यो

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

॥ ७ ॥ सवधूकः स वासौकः । सवयीभिरनीयत ॥ बलेनागस्करः कारा—गारमारक्षकैरिव ॥ ८ ॥
योगीव जाग्रदेवासौ । वासौकसि निशि स्थितः ॥ विषलिप्तामिव वधूं । नास्पृशत्पाणिनापि तां ॥
॥ ९ ॥ निद्रामुद्रितनेत्राब्जां । जनीं नीरजिनीमिव ॥ मुक्त्वा निशीथे शेतेस्म । मित्रमध्यमुपेत्य
सः ॥ १० ॥ अपश्यंती प्रियं तल्पे । प्रभाते धननंदिनी ॥ दिनेशेऽभ्युदिते शोक—तमसा जग्रसेऽ-
द्भुतं ॥ ११ ॥ अवलोक्य च खे खेलत् । प्रभाते मित्रमंडलं ॥ ययौ वनं वियन्नीलं । रंतुं तन्मि-

नहि. ॥ ७ ॥ पछी पोलीस बलात्कारे गुन्हेगारने जेम केदखानामां तेम मित्रो तेने वहुसहित
वासभुवनमां लेइ गया. ॥ ८ ॥ त्यां वासभुवनमां ते योगीनीपेठे रात्रिए जागतोज रह्यो, परंतु
जाणे फेरथी लींपायेली होय नहि तेम तेणे ते धनश्रीने हाथथी पण स्पर्श कर्यो नहि. ॥ ९ ॥
पछी कमलिनीनीपेठे निद्राथी मींचायेली आंखोवाळी ते धनश्रीने छोडीने मध्यरात्रिए ते पोता-
ना मित्रोपासे आवीने सूइ रह्यो. ॥ १० ॥ पछी प्रभाते बिछानामां पोताना स्वामीने नहि जोती
एवी ते धनश्री आश्चर्य छे के सूर्योदय थया छतां पण शोकरूपी अंधकारथी व्याप्त थइ. ॥ ११ ॥
पछी प्रभाते सूर्यमंडलने आकाशमां क्रीडा करतुं जोइने ते मित्रमंडल पण आकाशसरखा नी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रमंडलं ॥ १२ ॥ नूनं दृष्टव्यलीकासु । न रज्ये रमणीष्वहं ॥ बलादप्यबलासंगं । कर्त्तारो माममी
पुनः ॥ १३ ॥ व्याजेनाजनि यद्येवं । मां विवाहयिता पिता ॥ तन्मे गृहमपि त्यक्त्वा । गंतव्यं क्व-
चिदन्यतः ॥ १४ ॥ ध्यात्वेति काननक्रीडा—व्याकुले सुहृदां कुले ॥ समुद्रोऽनश्यदन्याऽन्य—वृ-
क्षवीक्षणदंभतः ॥ १५ ॥ आयांतः पृष्टतोऽप्येतत्—सुहृदः स्नेहसुंदराः ॥ अनीक्ष्य तमजायंत । वी-
क्षापन्नाः क्षणादपि ॥ १६ ॥ वयस्यैर्वीक्षितोऽप्येष । नाधिजग्मे यदा तदा ॥ पुरो धनस्य पूत्क्रे ।

---

ला वनमां क्रीडा करवा गयुं. ॥ १२ ॥ त्यां समुद्रदत्ते विचार्युं के दीठेला छे दोषो जेणीना एवी
स्त्रीओमां हुं खरेखर राग धरतो नथी, अने आ मित्रो मने बलात्कारे पण स्त्रीनो संग करावशे.
॥ १३ ॥ ज्यारे मारा पिताए बहानुं कहाडीने आवी रीते मने परणाव्यो छे, त्यारे मारे हवे घर
पण छोडीने क्यांक अन्य स्थले जवुं. ॥ १४ ॥ एम विचारीने मित्रोनो समुह ज्यारे वनक्रीडा
करवामां रोकायो हतो, त्यारे ते समुद्रदत्त बीजां बीजां वृक्षो जोवाना मिषथी त्यांथी नाशी गयो.
॥ १५ ॥ पछी तेना स्नेही मित्रो जो के तेनी पाछळ आव्या, परंतु तेने न जोवाथी क्षणवारमां
तेओ वीलखा पडी गया. ॥ १६ ॥ पछी तेओए शोध कर्या छतां पण ज्यारे ते न मळ्यो त्यारे चो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्ञो हृतधनैरिव ॥ १७ ॥ सपौरुषैः स पुरुषै—र्धनोऽपि तमशोधयत् ॥ क्वापि नापत्पुनः पाथो—नाथांतश्च्युतरत्नवत् ॥ १८ ॥ सापि बाला शुचोत्ताला । विलपंती वियोगतः ॥ वर्ष्म ग्रीष्मस्य वासाय । वर्षाणां चाक्षिणी ददौ ॥ १९ ॥ हृदि संक्रांतदुःखौ तौ । पितरौ तामवोचतां ॥ धत्से वत्सेऽव्यवच्छेदं । किं खेदं चेति चिंतया ॥ २० ॥ निबद्धं प्राग्भवे कर्म । जंतुना यच्छुभाशुभं ॥ प्रभूयंति निरोध्धुं त—द्विपाकं नाकिनोऽपि न ॥ २१ ॥ प्राग्भवोपार्जितं कर्म । ददातीह भवे फलं ॥ ग·

---

रायेला धनवाळा जेम राजापासे तेम तेणे धनशेठनीपासे पोकार कर्यो. ॥ १७ ॥ त्यारे हिमतवान पुरुषो मारफते धनश्रेष्टिए तेनी शोध करावी, परंतु समुद्रनी अंदर पडेलां रत्ननीपेठे ते क्यांय पण हाथ लाग्यो नहि. ॥ १८ ॥ शोकथी व्याकुल थयेली ते धनश्रीए पण भर्तारना वियोगथी विलाप करतांथकां ग्रीष्म ऋतुने वसवामाटे पोतानुं शरीर तथा वर्षा ऋतुने वसवामाटे पोतानी आंखो आपी. ॥ १९ ॥ त्यारे हृदयमां दुःखी थयेला तेणीना मातपिता तेणीने कहेवा लाग्या के हे वत्स! तुं आवी रीतनी चिंताथी शामाटे अत्यंत खेद धारण करे छे. ॥ २० ॥ पूर्व भवमां प्राणीए जे शुभ अथवा अशुभ कर्म बांध्युं छे तेना विपाकने रोकवाने देवो पण समर्थ थ·

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

र्जितो जलदः शीत–काले वर्षासु वर्षति ॥ २२ ॥ भुंजते स्वकृतं कर्म । विश्वे विश्वेऽपि जंतवः ॥
शोभामात्रफला ह्येते । पितृभ्रातृसुतादयः ॥ २३ ॥ तत्त्वं पितृपदोपांते । स्थिता पुण्यानि संचय ॥
पुण्यैः कदापि क्षीयेत । कर्म भोगांतरायकं ॥ २४ ॥ सा पित्रोरनुशिष्टयेति । यष्ट्येवात्तावलंबना ॥
स्वं बाह्यशोकजंबालात् । कथंचिदुददीधरत् ॥ २५ ॥ ननाश सागरन्यासः । पाणितो नः प्रमादतः
॥ इतीव लज्जाभारेण । पादैर्मंदप्रपातिभिः ॥ २६ ॥ व्यावृत्त्याथ वयस्यास्ते । प्रापुरुज्जयिनीं पुरीं

ता नथी. ॥ २१ ॥ पूर्व भवमां उपार्जन करेलुं कर्म आ भवमां फल आपे छे, केमके शियाला-
मां गर्जित थयेलो वरसाद वर्षाऋतुमां वरसे छे. ॥ २२ ॥ आ दुनियामां सर्व प्राणीओ पोतानुं क-
रेलुं कर्म भोगवे छे, अने आ पिता, भाइ, तथा पुत्र आदिको तो शोभामात्र फलवाळा छे. ॥
॥ २३ ॥ माटे तुं अहीं मातपिताना चरणोपासे रहीने पुण्योनो संचय कर? केमके कदाच पु-
ण्योथी तारुं भोगांतराय कर्म क्षीण पण थशे. ॥ २४ ॥ हवे एवी रीतनी पोताना मातपितानी
शिखामणरूपी लाकडीनुं अवलंबन लेइने केटलेक प्रयासे तेणीए बहारना शोकरूपी कादवमांथी
पोताना आत्मानो उद्धार कर्यो. ॥ २५ ॥ अरे! आपणी गफलतीथी सागरशेठनी थापण आप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ हत्याकारा इव म्लाना: । शप्ता इव निरौजसः ॥ २७ ॥ युग्मं ॥ सदारं दारकं नूनं । दृक्ष्यावो- ऽथाचिरादपि ॥ ध्यावोः पित्रोः समुद्रस्य । तस्थुस्ते साश्रवः पुरः ॥ २८ ॥ समुद्रोऽस्ति शुभंयुः कि —मित्यौत्सुक्येन पृष्ठतोः ॥ तयोस्तनुरुहः शुद्धिं । ते जगुः स्खलदक्षरं ॥ २९ ॥ हा नौ स्पृहय- तोर्लाभं । मूलक्षतिरभूदिति ॥ लपंतौ तौ शुचाशैला—क्रांताविव बभूवतुः ॥ ३० ॥

---

णा हाथमांथी गुम थइ, एम विचारीने जाणे लज्जाना भारथी होय नहि तेम मंद पग्लतां पग- लांउथी ॥ २६ ॥ ते मित्रो त्यांथी पाछा वळीने हत्या करनाराउनीपेठे म्लान थयेला तथा श्रा- प पामेलानीपेठे निस्तेज थयाथका उज्जयिनी नगरीमां आव्या. ॥ २७ ॥ आपणे हवे तुरतज आपणा पुत्रने वहुसहित जोइशुं, एम समुद्रदत्तना मातपिता विचारते छते ते मित्रो आंसुसहित तेनीपासे आवी उभा. ॥ २८ ॥ शुं समुद्रदत्त खुशीमां तो छे नी? एम तेउए आतुरताथी पूछ्या- थी ते मित्रोए लथमता अक्षरोथी तेना पुत्रना समाचार कह्या. ॥ २९ ॥ अरेरे! अमोने तो लाभनी इछा करतां उलटी मूलनी पण हानि थइ, एम बोलताथका तेउ शोकरूपी पर्वतथी द- बायेलानीपेठे थइ गया. ॥ ३० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ पंजरनिर्मुक्तः । पक्षीव सकलामिलां ॥ समुद्रो भ्राम्यदन्यान्य—नेपथ्यग्रहणाग्रहः ॥
॥ ३१ ॥ वर्षाणि द्वादशातीत्य । स कार्पटिकवेषभृत ॥ जिज्ञासुः स्वप्रियावृत्तं । पुनस्तत्पुरमाययौ ॥
॥ ३२ ॥ धनस्य सोऽमिलत्तेन । किं त्वं वेत्सीत्यभाष्यत ॥ सर्वं वेद्मीत्यनेनोक्ते । प्रत्युवाच धनः
पुनः ॥ ३३ ॥ उदारांग मदाराम—द्रुमांस्तर्हि विवर्ध्दय ॥ एकैकं रूपकं दास्ये । कर्मभर्मणि तेऽ-
न्वहं ॥ ३४ ॥ प्रसत्तिस्तव यद्यस्ति । रूपकैस्तदलं मम ॥ इति तस्य प्रियालापैः । समाधत्ताधिकं

---

हवे पांजरामांथी बुटा थयेला पक्षीनीपेठे समुद्रदत्त जूदा जूदा वेषो लेइने समस्त पृथ्वीपर भमवा लाग्यो. ॥ ३१ ॥ एवी रीते बार वर्षो वीत्याबाद ते समुद्रदत्त कापमीनो वेष लेइने पोतानी स्त्रीनी हकीकत जाणवामाटे फरीने ते नगरमां आव्यो. ॥ ३२ ॥ पछी त्यां ते धनश्रेष्टीने मल्यो, तेणे तेने पूछ्युं के तुं शुं जाणे छे? त्यारे समुद्रदत्त बोल्यो के हुं सघळुं जाणुं छुं, त्यारे वळी ते धनश्रेष्टी बोल्यो के, ॥ ३३ ॥ हे मनोहर शरीरवाळा! त्यारे तुं मारा बगीचाना वृक्षोनुं पोषण कर? अने ते कार्यमाटे तने हमेशां एकेक रुपीउं हुं आपीश. ॥ ३४ ॥ जो आपनी कृपा छे तो मारे रुपीयानी कइं जरुर नथी, एवी रीतनां तेनां प्रिय वचनोथी ते धनशेठ अधिक खु-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

धनः ॥ ३५ ॥ समानयोनी वनवृक्षवासिनौ । सितच्छवी व्योमगती उभावपि ॥ तथापि दुर्वागिति निंदितो जनैः—र्ध्वांक्षः पिकस्तु प्रियवागिति स्तुतः ॥ ३६ ॥ वृक्षायुर्वेदवित्सोऽथ । तथाराममपालयत् ॥ गां गोपस्तनयं वप्ता । दलं तांबुलिको यथा ॥ ३७ ॥ सुराज्ञीव प्रजास्तस्मिन् । पालके विपिनद्रुमाः ॥ बभूवुः सततं भूरि-फलपुष्पादिसंपदः ॥ ३८ ॥ मधुकर्यो वनस्यास्य । दृष्ट्वा नवमिवोध्रुवं ॥ जगुर्मंगलकारिण्य । इव झंकारदंभतः ॥ ३९ ॥ दृष्ट्वा पुष्पफलश्रीणां । वनं सत्वमिव ध्रुवं ॥

---

शी थयो. ॥ ३५ ॥ समान जातिवाळा, वनवृक्षोपर रहेनारा, काळा रंगना, तथा आकाशमां गमन करनारा एवा काग अने कोयल बन्ने सरखा छे, तो पण कागडाने दुर्वचनवाळो जाणीने लोकोए निंदेलो छे, तथा कोयलने प्रियवचनवाळी जाणीने तेनी प्रशंसा करेली छे. ॥ ३६ ॥ हवे गोवाळ जेम गायनी, पिता जेम पुत्रनी, तथा तंबोली जेम पाननी तेम वृक्षोसंबंधी आयुर्वेदने जाणनारा ते समुद्रदत्ते ते बगीचानी मावजत करवा मांडी. ॥ ३७ ॥ उत्तम राजा जेम प्रजानुं तेम ते समुद्रदत्त तेनुं पोषण करते छते ते बगीचानां वृक्षो जत्थाबंध फलपुष्पादिक आपनारां थयां. ॥ ३८ ॥ ते वननी एवी रीतनी नवी संपत्ति जोइने झंकारना मिषथी भमरीओ मंगलपाठकनीपेठे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्विजा न मुमुचुः पार्श्वं । लोकाः कोलाहलाकुलाः ॥ ४० ॥ विकाशिकुसुमाकीर्णं । स्निग्धसांद्रह-रिद्द्रुमं ॥ तेने तारकितव्योम—भ्रमं तद्वनमह्न्यपि ॥ ४१ ॥ सद्रसास्वादनफला । सच्छायाशुक-विप्रिया ॥ दृष्टा धनं धिनोतिस्म । वाटिका नाटिकेव सा ॥ ४३ ॥ जीयास्तां वृक्षजीवातू । कला-कर करौ तव ॥ एवं निःस्पृहबंदीव । तं स्तौतिस्म मुहुर्मुहुः ॥ ४४ ॥ श्रयमुच्चैः कलासद्म । कर्म

गायन करवा लागी. ॥ ३९ ॥ पुष्पो अने फलोनी संपत्तिनी दानशाळासरखा ते बगीचाने जो-इने कोलाहल करताथका ब्राह्मणोए (कागडाउए) तेउनुं पासखुं छोड्युं नहि. ॥ ४० ॥ विकस्व-र पुष्पोथी भरेलो तथा घाटां लीलां वृक्षोवाळो ते बगीचो दिवसे पण ताराउवाळा आकाशनो भ्रम उपजावतो हतो. ॥ ४१ ॥ मनोहर रसना स्वादरूपी फलवाळी उत्तम छायावाळी तथा शुक-पक्षिउने (शीघ्र कविउने) प्रिय एवी ते वाडी नाटिकानीपेठे धनश्रेष्ठिने खुश करवा लागी. ॥ ४३ ॥ हे कलाकर! वृक्षोने पुष्ट करनारा तारा बन्ने हाथो जय पामो? एवी रीते लालचविना-ना बंदीनीपेठे धनश्रेष्ठी तेनी वारंवार स्तुति करवा लाग्यो. ॥ ४४ ॥ आ उंचा प्रकारनी कलावा-ळो माणस नीच कार्य करवाने लायक नथी, एम विचारीने धनश्रेष्ठिए तेने बगीचामांथी दूर क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नीचैर्न चार्हति ॥ ध्यात्वेति तं वनाद्दूरी—कृत्य स्वाट्टे न्यवेशयत् ॥ ४५ ॥ जग्राह ग्राहकादेष । मृदुवाग्दानतो धनं ॥ अकोपनो गोप इव । धेनुर्दुग्धं तृणार्पणात् ॥ ४६ ॥ कलावत्युदिते नित्यं । तस्मिन्नमृतवर्षिणि ॥ मुखमुद्रान्यवद्धेष—हट्टेषु कुमुदेष्विव ॥ ४७ ॥ महर्घ्यमपि तस्याट्टाद्—ग्राहका वस्तु गृह्णते ॥ पुनर्मुधापि नान्येभ्यः । प्रजारागो हि दुर्लभः ॥४८॥ श्रुत्योर्नस्त्वं निजं नामो—त्तंसयेत्यर्थितो जनैः ॥ स स्वस्याकलयन्नाम । विनीत इति सान्वयं ॥ ४९ ॥ कलाकौशलतः

रीने पोतानी दुकाने बेसाड्यो. ॥ ४५ ॥ गुस्सो नहि करनारो गोवाळ गायने घास आपीने जेम दूध ग्रहण करे तेम ते त्यां मिष्ट वचनो आपीने ग्राहकोपासेथी धन लेवा लाग्यो. ॥ ४६ ॥ एवी रीते अमृत वर्षनारो ते कलावान समुद्रदत्त हमेशां उदय पामवाथी कुमुदोनीपेठे बाकीनी दुकानोपर मुखमुद्रा थइ एटले ग्राहकोविना तालां देवाइ गयां. ॥ ४७ ॥ मोंघी मळवा छतां पण ग्राहको तेनी दुकानेथी वस्तु लेवा लाग्या, अने बीजी दुकानेथी तो मफत पण लेता नहि, केमके प्रजाराग दुर्लभ होय छे. ॥ ४८ ॥ तारा नामथी अमारा कर्णो शोभाव? एम लोकोए प्रार्थना कर्याथी तेणे पोतानुं विनीत एवुं सार्थक नाम आप्युं. ॥ ४९ ॥ कलाकौशलथी ख्याति पा

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ख्यातं । मा महीशो ग्रहीदमुं ॥ इति स्वसद्मनि धनः । कोशाध्यक्षं व्यधत्त तं ॥ ५० ॥ विनीतो नीतिमानेष । यदादिशति किंचन ॥ तन्मान्यमितरैरेवं । सोऽन्वशात् स्वं परिच्छदं ॥ ५१ ॥ सोऽपि दानेन मानेना-ऽप्रीणात्परिजनं तथा ॥ यथा सर्वोऽपि तद्दत्त-मेवादत्त दशावधि ॥ ५२ ॥ धनश्रि-यो विशेषेण । तेनानुववृते मनः ॥ अपि चेटोचितं कर्म । स्वयं तस्या विनिर्ममे ॥ ५३ ॥ तस्याः प्रभोरिवादेशं । न ललंघे मनागपि ॥ विदधेऽभिदधे तच्च । यत्तस्या एव रोचते ॥ ५४ ॥ एवं स्व-

मेला आ विनीतने जो राजा न लेइ ले तो ठीक, एम विचारीने धनश्रेष्ठीए तेने पोताना घरमां भंडारी बनाव्यो. ॥ ५० ॥ आ नीतिवान विनीत जे कइं हुकम करे ते बीजाए मानवो, एम ते-णे पोताना परिवारने फरमाव्युं. ॥ ५१ ॥ पछी ते विनीत पण दान अने मानथी ते परिवारने एवो तो खुश करवा लाग्यो के जेथी तेओ सघळा ठेक दोरासुधी तेणेज आपेलुं लेवा लाग्या. ॥ ५२ ॥ वळी ते विनीत पण धनश्रीना मनने विशेष प्रकारे अनुसरवा लाग्यो, तथा तेणीनुं दासोचित कार्य पण पोते करवा लाग्यो. ॥ ५३ ॥ वळी शेठना हुकमनीपेठे तेणीना हुकमनो [illegible] जरा पण अनादर करतो नहि, तथा तेणीनेज जे गमे तेज ते करतो तथा कहेतो हतो. ॥

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

रूपदिनैः सोऽभूत् । तस्या विश्वासभाजनं ॥ हृदयायैव सा तस्मै । रहस्यमपि नाह्नुत ॥ ५५ ॥ वेश्मनः सप्तभौमस्यो—परि वातायनस्थिता ॥ सा किंचिच्चर्वितरसं । तांबूलं मुमुचेऽन्यदा ॥ ५६ ॥
तांबूलः काकतालीय-न्यायेनाधः पपात सः ॥ व्रजतः पथि दुर्वार—स्तलारक्षस्य मूर्द्धनि ॥ ५७ ॥
धौतधूपितवस्त्रोऽसौ । नव्यदिव्यांगरागभृत् ॥ पुष्पापूरितधम्मिल्लो । विवाहार्थमिवोद्यतः ॥ ५८ ॥
किमियं विट्विहंगस्ये-त्यूर्ध्वं पश्यन्निरैक्षत ॥ पाथोदपथपाथोज—भ्रांतिदायि तदाननं ॥ ५९ ॥

---

॥ ५४ ॥ एवी रीते थोडा दिवसोमांज ते तेणीनो विश्वासपात्र थइ पड्यो, अने तेथी पोताना हृदयनीपेठे तेणी तेनाथी गुप्त वात पण छुपावती नहि. ॥ ५५ ॥ एक दिवसे घरनी सातमी भोंए झरुखामां बेठेली एवी ते धनश्रीए थोमांक चावेलां तांबूलनो रस थुंक्यो. ॥ ५६ ॥ हवे न अटकावी शकाय एवो ते तांबूलनो रस काकतालीय न्यायथी नीचे मार्गमां चालता कोटवाळना मस्तकपर पड्यो. ॥ ५७ ॥ ते वखते ते जाणे परणवामाटे जतो होय नहि तेम धोएलां अने धूपेलां वस्त्रोवाळो, नवां अने दिव्य अंगविलेपनवाळो तथा पुष्पोथी गुंथेला केशोवाळो हतो. ॥ ॥ ५८ ॥ शुं आ कोइ पक्षीनी विट पमी? एम विचारी उंचुं जोतांथकां तेणे आकाशकमलनी

दध्यौ चास्या मुखौपम्य-मिंदुनापि कदापि न ॥ यतो याते ममोन्मेष—मक्षरं चक्षुरंबुजे ॥ ६० ॥
अहो नेत्रे श्रियः पात्रे । अहो पद्मसखं मुखं ॥ अहो स्तनौ पीनघनौ । अहो शोभायुजौ भुजौ
॥ ६१ ॥ तांबूलो मूर्ध्नि मे लग्नो । रंगश्च ववृधे हृदि ॥ तदिदं भोजिते चैत्रे । मैत्रस्योदरपूरणं ॥
॥ ६२ ॥ तस्य तां पश्यतो मोहं । कृत्वाथ स्मरदांभिकः ॥ वसत्यपि पुरे यत्नं । धृतिरत्नमचूचुरत्
॥ ६३ ॥ भविता संगमोऽस्या मे । श्यामेतररुचः कथं ॥ विमृशन्निति सोऽपश्य—द्विनीतं तं तदं-

भ्रांति आपनारुं तेणीनुं मुख जोयुं. ॥ ५९ ॥ त्यारे तेणे विचार्युं के आना मुखनी उपमा कोइ पण दिवसे चंद्रने पण आपी शकाय तेम नथी, केमके आने जोवाथी मारां चक्षुरूपी कमल कइं पण अटकावविना उलटां विकसीत थयां छे. ॥ ६० ॥ अहो! आ स्त्रीनां चक्षुउ लक्ष्मीना पात्ररूप छे, मुख कमलसरखुं छे, स्तनो पुष्ट अने कठण छे, तथा हाथो शोभावाळा छे. ॥ ६१ ॥ तांबूलनो रस तो मारा मस्तकपर लाग्यो, परंतु रंग तो मारा हृदयमां वृद्धि पाम्यो, माटे आ तो चैत्रे भोजन कर्याथी मैत्रनुं उदर भरवाजेवुं थयुं! ॥ ६२ ॥ हवे मोहथी तेणीने जोतांथकां कामदेवरूपी कपटी चोरे नगरनी भरचक वस्तीवच्चे पण तेनुं धैर्यरूपी रत्न चोरी लीधुं. ॥ ६३ ॥ हृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिके ॥ ६४ ॥ ध्रुवं धनगृहे मान्यो । विनीतो विनयावनिः ॥ तदुपायोऽनपायोऽय—मेव लब्धुं ध-
नश्रियं ॥ ६५ ॥ इति जातमतिस्तं स । समानीय स्ववेश्मनि ॥ कुलदैवतवद्वस्त्र—भूषणाद्यैरपू पु-
जत् ॥ ६६ ॥ लोकेऽत्र दानमेकं हि । वश्यकर्मणि कार्मणं ॥ मातंगमपि सेवंते । दानसक्तं सदा-
लयः ॥ ६७ ॥ नत्वा क्रमद्वयं तस्य । स बद्धांजलिरब्रवीत् ॥ वयस्य चेत्प्रसन्नोऽसि । तन्मेलय ध-

---

वे मने आ श्वेत कांतिवाळी स्त्रीनो संग शीरीते थशे? एम विचारतांथकां तेणे तेणीनीपासे उ
भेला विनीतने जोयो. ॥ ६४ ॥ खरेखर आ विनयी विनीत धनशेठना घरमां मानीतो माणस
छे, माटे धनश्रीने मेलववामाटे तेज निर्विघ्न उपायरूप छे. ॥ ६५ ॥ एवी रीतनी बुद्धि थवाथी
ते कोठवाळे ते विनीतने पोताने घेर बोलावीने कुलदेवीनीपेठे तेनी वस्त्र तथा आभूषणआदि-
कोथी पूजा करी. ॥ ६६ ॥ आ जगतमां खरेखर एक दानज वश करवामां कामणसमान छे, के-
मके दान ( मद ) आपनार मातंगने ( हाथीने ) पण विद्वानोनी श्रेणि ( भमरा ) हमेशां से-
वे छे. ॥ ६७ ॥ पछी तेना बन्ने चरणोने नमीने ते हाथ जोडीने बोल्यो के हे मित्र! जो तुं मा-
रापर प्रसन्न थयो होय तो धनश्रीनो मेलाप कराव? ॥ ६८ ॥ ठीक छे एम कहीने ते सघळो वृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नश्रियं ॥ ६८ ॥ तमित्युक्त्वा रहोऽवादीत् । तत्सर्वं स धनश्रियः ॥ सान्यथाद्भृकुटीभीष्म—भाला
ज्वालाकिरं गिरं ॥ ६७ ॥ कोऽप्यन्यो वक्ति यद्येवं । तं कृतांतालये नये ॥ मान्यत्वात्त्वं तु मुक्तो-
ऽसि । तन्मा पुनरिदं ब्रवीः ॥ ७० ॥ निषिद्धोऽपि तयावार्थे । पृष्ठत्यारक्षके पुनः ॥ असिद्धमपि
सिद्धं तत् । कार्यं तस्मै जगाद सः ॥ ७१ ॥ सोऽथावसथमागत्य । विमना मलिनाननः ॥ भग्नपो-
त इव स्तेन—गृहीत इव तस्थिवान् ॥ ७२ ॥ तदवस्थं तमालोक्य । बभाषे धननंदिनी ॥ चिन्ते

त्यां तेणे गुप्त रीते धनश्रीने कह्यो, त्यारे भृकुटीथी भयंकर ललाटवाळी ते धनश्रीए तेने अग्नि-
नी ज्वालासरखुं वचन कह्युं के, ॥ ६७ ॥ जो कोइ बीजो मने आवी रीते कहे तो तेने तो य-
मने घेर मोकली आपुं, परंतु तुं मारे माननीक होवाथी हुं तने छोडी देउं छुं, माटे फरीने आ-
वुं न बोलजे. ॥ ७० ॥ एवी रीते तेणीए ते कार्यमाटे निषेध कर्या छतां पण पाछुं ज्यारे कोट-
वाळे तेने पूछ्युं त्यारे कार्य पार पड्या विना पण तेणे तेने कह्युं के तारुं कार्य में पार पाडी आ-
प्युं छे. ॥ ७१ ॥ पछी ते विनीत घेर आवीने विलखां मुखवाळो बेचेन थइने जाणे पोतानुं वहा-
ण भांगी गयुं होय नहि तेम जाणे चोरोए लुंटी लीधो होय नहि तेम ते बेठो. ॥ ७२ ॥ हवे

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

षि न्नोः किमारब्धा—त्वं नेको भुजगादिव ॥ १३ ॥ एवमेवेति तेनोक्ते । सुधाक्तं सामुचद्वचः ॥
मिलितव्यं त्वया नातः—परं तस्य गुणाकर ॥ १४ ॥ ततोऽतीत्य दिनान् स त्रि—चतुरांश्चतुराश-
यः ॥ पुनर्विषादविन्नाय—मुखोऽवादि धनश्रिया ॥ १५ ॥ जानामि कामिना तेन । मत्कृते दूय-
सेतरां ॥ ततोऽशोकवनीमेतु । सोऽद्य सोद्यममानसः ॥ १६ ॥ त्वं च पर्यंकमास्तृत्य । ततो मैरे-
यमानयेः ॥ श्रुत्वेति दध्यिवानेष । धिग्योषिज्जनचापलं ॥ १७ ॥ न स्यान्नारीषु सौशील्यं । स्याद्वा

एवी अवस्थावाळा तेने जोइने धनश्री बोली के अरे! सर्पथी जेम देडकुं तेम शुं तुं कोटवालथी
डरे छे? ॥१३॥ एमज छे, एम तेणे कह्याथी ते अमृतसरखुं वचन बोली के, हे गुणाकर! आज
पछी तारे तेने मलवुं नहि. ॥ १४ ॥ पछी त्रण चार दिवसो गयाबाद ते चतुर आशयवालो वि-
नीत फरीने ज्यारे पाछो शोकथी विलखा मुखवाळो थइने बेठो त्यारे धनश्रीए तेने कह्युं के, ॥
॥ १५ ॥ हुं धारुं छुं के ते कामी कोटवाळ मारेमाटे तने कष्ट आपे छे, माटे आजे ते कोटवाळ
भले तैयार थइने अशोकवाटिकामां आवे. ॥ १६ ॥ अने तारे त्यां पलंग बिछावीने दारु लाव-
वो, ते सांभलीने तेणे विचार्युं के धिक्कार छे स्त्रीनी चपलताने. ॥ १७ ॥ स्त्रीओमां सुशीलपणुं हो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तन्न चिरस्थिति ॥ आमेष्टिककृतौकोव—न्मुंडमौलिस्थपुष्पवत् ॥ ७७ ॥ अपश्यं चतुरो वर्णा—नभ्रमं भूयसीं भुवं ॥ पुनः सर्वत्र नारीषु । दृष्टिष्विव कुशीलता ॥ ७७ ॥ वाग्मार्दवं सुरूपत्वं । लीला-सुभगता यथा ॥ तथा स्थैर्यमपि स्त्रीषु । धातस्तात न किं कृतं ॥ ८० ॥ ध्यात्वेत्युपवने धाम्नः । शय्यां सज्जीचकार सः ॥ नवमासवमानीया—जुहावारक्षकं ततः ॥ ८१ ॥ अथारक्षः कृतस्नानः । सर्वालंकारभासुरः ॥ श्वशुरोक इवाशोक—वनिकामार मारभूः ॥ ८२ ॥ तदावदातशृंगारा । तत्रा

तुं नथी, अने कदाच होय तो पण ते काची इंटोथी बनावेलां घरनीपेठे तथा मुंमनां मस्तकपर रहेलां पुष्पनीपेठे घणो काळ टकतुं नथी. ॥ ७७ ॥ में चारे वर्णो जोया, तथा घणी भूमीपर हुं भम्यो, परंतु सर्व जगोए खेरुतोनीपेठे स्त्रीओमां तो कुशीलपणुंज ( कोशज ) जोयुं. ॥ ७७ ॥ हे विधातारूप पिताजी! स्त्रीओमां जेम तें वचनोनी कोमळता, सुरूपपणुं, लीला तथा सौभाग्यपणुं बनाव्युं छे, तेम तेओमां तें स्थिरपणुं शामाटे न बनाव्युं? ॥ ८० ॥ एम विचारीने तेणे घरना बगीचामां शय्या तैयार करी, तथा पछी तेणे नवो दारु लावीने कोटवालने त्यां बोलाव्यो. ॥८१॥ हवे ते कोटवाल पण स्नान करी सर्व आभूषणोथी शोभितो तथा कामातुर थइने जेम ससराने

याता धनांगजा ॥ इंदुलेखेव तच्चेतो—वार्द्धिमुन्नृंखलं व्यधात् ॥ ८३ ॥ प्रत्यक्षवनदेवीव । सा प-
र्यंके निषेदुषी ॥ मद्यं मृदूक्तिरभ्यर्थ्य । पाययामास सा द्रुतं ॥ ८४ ॥ प्रथमं मदनेनासौ । पश्चा-
न्मदनयानया ॥ गतजीव इवारक्ष—श्चैतन्यभ्रंशमाप सः ॥ ८५ ॥ अथ तस्यैव खड्गेन । शिरस्त-
स्य लुलाव सा ॥ साहसिक्यो ध्रुवं प्राण—दानग्रहणयोः स्त्रियः ॥ ८६ ॥ स्व एवासिर्विनाशाय ।
तस्याजायत सांप्रतं ॥ धाटी स्वघोटकैरेव । यतः पतति दुर्धियं ॥ ८७ ॥ सा तमेव तलारक्ष—कं-

घेर तेम अशोकवाटिकामां गयो. ॥ ८२ ॥ ते वखते मनोहर शृंगारवाली धनश्री पण त्यां आवी,
तथा चंद्रनी कळानीपेठे तेणीए तेना चित्तरूपी समुद्रने उछळेलो कर्यो. ॥ ८३ ॥ पछी प्रत्यक्ष
वनदेवीनीपेठे तेणीए पलंगपर बेशीने मिष्ट वचनोथी प्रार्थनापूर्वक जलदी तेने मदिरापान क-
राव्युं. ॥ ८४ ॥ हवे प्रथम कामदेवथी तथा पछी आ मदिराथी जाणे निर्जीव थयो होय नहि
तेम ते कोटवाल चैतन्यरहित थयो. ॥ ८५ ॥ पछी तेणीए तेनीज तलवारथी तेनुं मस्तक छेदी
नाख्युं, केमके स्त्रीओ खरेखर प्राणो देवामां तथा लेवामां साहसीक होय छे. ॥ ८६ ॥ एवी रीते
ते समये तेनी पोतानीज तलवार तेनो नाश करनारी थइ, केमके दुर्बुद्धिमाणसपर तेना पोता-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ठकर्त्तननिःकृपं ॥ चंम्किकेवासिमुद्गीर्य । विनीतं प्रत्यधावत ॥ ८८ ॥ सोऽपि प्रस्तावविचत्तस्याः । प्र-
पेदे शरणं पदौ ॥ कृपाणं सह कोपेन । संवृत्याथ जगाद सा ॥ ८९ ॥ मुमुर्षुरसि रे मूर्ख । य-
न्मामीदृशकर्मणि ॥ अप्रेरयः पयःपूर । इव तृणामधोऽध्वनि ॥ ९० ॥ श्रितो मनोविनोदाय । म-
या त्वं पाप्मनेऽभवः ॥ भवनज्वालनायेव । दीपो दीप्तिकृते कृतः ॥ ९१ ॥ शीलं स्त्रिया ययात्या-

नाज़ घोमाजथी धाम पडे छे. ॥ ८७ ॥ पछी ते कोटवालनो कंठ कापवामां निर्दय एवी तेज त-
लवार उगामीने चंम्कीनीपेठे विनीतप्रते दोडी. ॥ ८८ ॥ त्यारे समय जाणनारो ते विनीत पण
तेणीनाज चरणोने शरणे गयो, त्यारे धनश्री पण कोपनी साथे तलवारने पण म्यानमां नाखी-
ने बोलली के, ॥ ८९ ॥ अरे मूर्ख! शुं तने मरवानी इछा थइ छे? के जलनुं पूर होडीने जेम
नीचे मार्गे लेइ जाय छे, तेम तें मने आवां कार्यमाटे प्रेरणा करी! ॥ ९० ॥ में फक्त मनना
विनोदमाटे तारो आश्रय कर्यो हतो, अने तुं तो पापी नीवड्यो, अने आ तो अजवाळांमाटे क-
रेलो दीवो जेम उलटो घरने बाळे तेनाजेवुं थयुं. ॥ ९१ ॥ जे स्त्रीए पोतांना अनुपम आभूष-
णसमान शील तजेलुं छे, ते माटी अने पत्थररूप सुवर्ण तथा मणिओनो भार शामाटे धारण क-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

जि । निर्व्याजं वर्ष्मभूषणं ॥ सा मृत्प्रस्तरयोर्हेम—मणीनां विभर्त्ति किं ॥ ७२ ॥ आस्तामयं सुरेंद्रोऽपि । मम शीलमहामणिं ॥ हर्त्तुं हृदयमंजूषा—मध्यस्थं न प्रभूयते ॥ ७३ ॥ एवं तन्निश्चयं साक्षा—द्वीक्ष्यालं स चमत्कृतः ॥ तदादेशात्तलारकं । न्यधान्निधिमिव क्षितौ ॥ ७४ ॥ अन्यदा तेन को भर्त्ता । तवेत्युक्ताभ्यधत्त सा ॥ अवंतीस्थो ममोढोढा । समुद्रः सागरांगभूः ॥ ७५ ॥ आपाणिपीडनदिना—त्परमेष क्वचिद्ययौ ॥ अनाहार्यैरभाग्यैर्मे । चातकस्येव वारिदः ॥ ७६ ॥ दि-

रे छे? ॥ ७२ ॥ अरे! आ कोटवाल तो एक बाजु रह्यो, परंतु देवेंद्र पण मारां हृदयरूपी पेटीमां रहेला शीलरूपी महामणिने हरवाने समर्थ नथी. ॥ ७३ ॥ एवी रीते साक्षात तेणीनो निश्चय जोइने ते अत्यंत आश्चर्य पाम्यो, तथा तेणीना हुकमथी तेणे निधाननीपेठे कोटवालने जमीनमां दाटी दीधो. ॥ ७४ ॥ पछी एक दिवसे ते विनीते तेणीने पूछ्युं के तारो भर्तार कोण छे? त्यारे ते बोली के अवंती नगरीनो रहेवासी सागरदत्त शेठनो समुद्रदत्त नामे पुत्र मने परण्यो छे. ॥ ७५ ॥ परंतु विवाहना दिवसथी मांमीने मारां अतिशय अभाग्योने लीधे चातकप्रते जेम मेघ तेम ते क्यांक चाल्यो गयो छे. ॥ ७६ ॥ अने त्यारथी वनमां उगेली मालतीनीपेठे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वसान् दैववैवश्यात् । पूरयामि ततः परं ॥ अरण्ये मालतीवाह—मुपभोगपराङ्मुखी ॥ ९७ ॥ त-
तो दृगंबुभिः कृप्त—कुल्या शल्यायितप्रिया ॥ तेन सावादि कारुण्य—कोमलीभूतचेतसा ॥ ९८ ॥
यद्यादिशसि तद्भद्रे । भ्रांत्वा देशांतरादपि ॥ आनयामि विवोढारं । तत्र वायुरिवांबुदं ॥ ९९ ॥
सा प्रत्युवाच यद्येवं । करोषि करुणापर ॥ तत्कस्त्वत्तोऽपरः प्राण—प्रदानप्रवणो मम ॥ २३०० ॥ वि-
सृष्टोऽथ तया मंक्षु । गत्वावंतीं ननाम सः ॥ कथास्मृतिपथानीत—तनुजौ पितरौ निजौ ॥ १ ॥

---

उपभोगरहित थइथकी कर्मना विपरीतपणाथी हुं मारा दिवसो पूरा करुं छुं. ॥ ९७ ॥ एम कही-
ने ते शल्यरूप भर्तारवाली धनश्री अश्रुजलनी नीक चलाववा लागी, त्यारे दयाथी कोमल थयेला चित्तवाळा विनीते तेणीने कह्युं के, ॥ ९८ ॥ हे भद्र! जो तुं कहे तो वायु जेम वरसादने तेम देशांतरमां भमीने पण हुं तारा भर्तारने शोधी लावुं. ॥ ९९ ॥ त्यारे तेणीए प्रत्युत्तर आप्यो के हे दयालु विनीत! जो तुं एम करीश तो पछी ताराशिवाय बीजो मने प्राणो देवामां प्रवीण कोण थइ शके? ॥ २३०० ॥ पछी तेणीए रजा आपवाथी ते जलदी अवंतीमां जइने (पोताना आगमनना) समाचारथी याद करावेल छे पुत्र जेउने एवा पोताना मातपिताने न-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं वीक्ष्य सहसा पित्रो–र्यो व्यवर्धत संमदः ॥ तत्प्रथिम्णः पुरः पाथो–नाथोऽप्यचुलुकायत ॥ २ ॥
तस्यागमं गिरिपुरे । पितृभ्यां बोधितो धनः ॥ पक्षती अपि कृत्वा तं । दृष्टुमायुत्सुकं दधौ ॥ ३ ॥
अथाह्वयन्नरैराप्तैः । स जामातुरनातुरः ॥ पुरस्कृतसखः सोऽपि । तत्र पित्रेरितो ययौ ॥ ४ ॥ मयूरी-
मिव वर्षर्तौ । कोकीमिव दिनोदये ॥ नृत्यंतीमुररीचक्रे । गौरवात्स धनश्रियं ॥ ५ ॥ यदन्नद्रोग-
दुर्भिक्षं । तस्या द्वादशवार्षिकं ॥ धाराधर इवाशेषं । तल्लुलोप स लोलुपः ॥ ६ ॥ हेतोः कुतोऽ-

---

म्यो. ॥ १ ॥ तेने अचानक आवेलो जोइने तेना मातपितानो जे हर्ष वृद्धि पाम्यो, तेना वि-
स्तार आगळ समुद्र पण एक अंजलिसरखो थइ गयो. ॥२॥ पछी तेना माबापे तेनुं आववुं गि-
रिपुरमां रहेला धनश्रेष्ठीने जणाव्युं, त्यारे ते धनश्रेष्ठी पांखो करीने पण ( त्यां जइ ) तेने मळ-
वाने उत्सुक थयो. ॥ ३ ॥ पछी तेणे हर्षित थइने पोताना मुनिमोने मोकली जमाइने बोला-
व्यो, त्यारे पिताए प्रेरणा कर्याथी समुद्रदत्त पण पोताना मित्रोने अगाडी करीने त्यां गयो. ॥४॥
वर्षाऋतुमां जेम मयूरी तथा दिनोदयसमये जेम कोकी तेम अत्यंत खुशी थयेली धनश्रीने ते-
णे आदरपूर्वक स्वीकारी. ॥ ५ ॥ हवे तेणीने जे बार वर्षासुधी भोगोनो दुकाळ पड्यो हतो, ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पि सान्येद्यु–र्दधाना दुर्मनायितं ॥ निदानं तेन दुःखस्य । पृष्टा स्पष्टमभाषत ॥ ७ ॥ नाथ प्राग-
तिथीभूते । दुस्सहे विरहे तव ॥ ममामिलत्पुमानेको । विवेको मूर्त्तिमानिव ॥ ८ ॥ स शीलशा-
लिकेदारो । विनीत इति विश्रुतः ॥ मनो विनोदयामास । चिरं त्वद्विरहातुरं ॥ ९ ॥ कियंतमपि
कालं स । स्थित्वा सूक्तसुधानिधिः ॥ त्वदानयनदंभेन । क्वापि न ज्ञायते गतः ॥ १० ॥ तवावा-

सघला दुकाळने वरसादनीपेठे तल्लीन थयेला समुद्रदत्ते दूर कर्यो. ॥ ६ ॥ पछी एक दिवसे कइं-
क कारणथी तेणीनुं मन ज्यारे दुभावा लाग्युं त्यारे समुद्रदत्ते दुःखनुं कारण पूछवाथी तेणीए
प्रगट रीते कह्युं के, ॥ ७ ॥ हे स्वामी! ज्यारे आपनो दुस्सह विरह मने थयो हतो त्यारे मने
मूर्तिवंत विवेकसरखो एक पुरुष मळ्यो हतो. ॥ ८ ॥ शीलरूपी डांगरना क्यारा सरखा ते विनीत
नामना पुरुषे आपना विरहथी आतुर थयेला मारा मनने घणा वखतसुधि खुशी कर्युं हतुं. ॥९॥
उत्तम वचनरूपी अमृतना निधानसरखो ते माणस केटलोक काळ रहीने आपने शोधी लाववा-
ना मिषथी कोण जाणे क्यां गयो छे, ते जणातुं नथी. ॥ १० ॥ माटे आपना मेळापना हर्षथी
अने तेना विरहनी पीडाथी एकी वखते प्रकाश अने अंधकारथी व्याप्त थयेली संध्यानीपेठे हुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रिमुदा तस्य । विरहव्यथयाप्यहं ॥ शश्वत्तेजस्तमिस्राभ्यां । संध्येवास्मि विडंबिता ॥ ११ ॥ विना
तेन विनीतेन । कलाकुमुदिनींदुना ॥ वैधुर्यध्वांतविध्वस्ता-ऽऽलोका रात्रिरिवाभवं ॥ १२ ॥ हसि-
त्वाथ समुद्रोऽव—क्कः शोकस्तत्कृते प्रिये ॥ यो निःशूक श्वारक्षं । चिक्षेप क्ष्मातले तदा ॥ १३ ॥
ततस्त्रपाभरेणेव । सा भृशं नमितानना ॥ स्ववृत्तशंसनात्तेन । समतोषि विशेषतः ॥ १४ ॥ धन-
श्रियं समादाय । धनश्रियमिवांगिनीं ॥ समुद्रोऽपि ततस्तुष्ट—हृदियाय पितुर्गृहं ॥ १५ ॥ तौ पर-

---

विडंबना पामी छुं. ॥ ११ ॥ कलारूपी कुमुदिनीने चंद्रसरखा एवा ते विनीतविना अधीराइरूपी
अंधकारथी नाश पामेला प्रकाशवाळी रात्रिसरखी हुं थइ गइ छुं. ॥ १२ ॥ त्यारे समुद्रदत्त हसी-
ने बोल्यो के हे प्रिये! जेणे निर्दयनीपेठे ते वखते कोटवालने जमीनमां दाटी दीधो तेनेमाटे
तारे शामाटे शोक करवो जोइये? ॥ १३ ॥ त्यारे जाणे लज्जाना भारथी होय नहि तेम अत्यं-
त नमेला मुखवाळी एवी ते धनश्रीने तेणे पोतानुं वृत्तांत कहीने वधारे खुशी करी. ॥ १४ ॥
पछी देहधारी महान लक्ष्मीसरखी धनश्रीने लेइने आनंदित मनवाळो समुद्रदत्त पण पोताना पि-
ताने घेर गयो. ॥ १५ ॥ पछी अत्यंत प्रीतिरसथी भरेला मनवाळा फक्त आकारथीज भिन्न तथा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रेमसर्वस्व—रससंपूर्णमानसौ ॥ मूर्त्यैव भिन्नौ चित्तैक्य—भाजौ जन्म व्यतीयतुः ॥ १६ ॥
सतीरत्नं यथा साधो । सा धनश्रीरुदाहृता ॥ तथा भवंति चेदन्या । अपि तत्को निषेधकः ॥१७॥
सदसत्त्वं हि कस्यापि । वस्तुनो नास्ति वास्तवं ॥ सदसत्त्वाधिरोपस्तु । रागद्वेषकृतः पुनः ॥ १८ ॥
विरक्तो मन्यसे सर्वा । योषा दोषाकरा इति ॥ संसारसारभूतास्ता । मन्येऽहं रागवान् पुनः ॥१९॥
निग्रहीतुमहं दुःखं । क्षमोऽस्मीति प्रजल्पता ॥ यत्त्वयास्ति प्रतिज्ञातं । तत्स्मारय मुनीश्वर ॥ २० ॥

---

मननी ऐक्यतावाळा एवा तेज बन्ने पोतानो जन्म व्यतीत करवा लाग्या. ॥ १६ ॥

एवी रीते हे मुनि! जेम सतीजमां रत्नसरखी धनश्रीनुं उदाहरण आप्युं तेम जो कोइ बीजी स्त्री पण होय तो तेनो कोण निषेध करी शके? ॥ १७ ॥ मुख्यत्वे करीने कोइ पण वस्तुनुं सत् असतपणुं नथी, सत् असत्पणानो जे आरोप मुकाय छे ते तो रागद्वेषथी थाय छे. ॥ १८ ॥ वळी हे मुनि! आप तो विरक्त होवाथी सर्व स्त्रीजने दोषोनी खाणसमान गणो छो, परंतु हुं तो रागी होवाथी ते स्त्रीजने संसारमां सारभूत मानुं छुं. ॥ १९ ॥ वळी हे मुनीश्वर! हुं दुःख दूर करवाने समर्थ छुं, एम कहीने आपे जे प्रतिज्ञा करेली छे, ते आप याद करो? ॥ २० ॥ हजु मा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

क्षीणा नाद्यापि भोगेच्छा । मनोऽद्यापि धनीयति ॥ तत्त्वामभ्यर्थये प्रीति—निचितं रचितांजलिः ॥
॥ २१ ॥ तथा कुरु यथात्रैव । यथा स्यां भोगभागहं ॥ न मंत्रसाधकस्येव । मम दूरफले स्पृहा ॥
॥ २२ ॥ तत्कालं न फलं दत्ते । यः स्वामीव निषेवितः ॥ कथं कालविलंबेन । धर्मः स च फलि-
ष्यति ॥ २३ ॥ एवं धम्मिल्लमालोक्य । सांदृष्टिकफलार्थिनं ॥ कृपारसलसच्चित्तो-ऽगलदत्तोऽब्रवीदि-
ति ॥ २४ ॥ सौम्य सद्भावसत्तायां । धर्मः फलति सत्वरं ॥ ईप्सितोदकमेदिन्यो-र्योगेनाम्रतरुर्यथा

री भोगोनी इच्छा क्षीण थइ नथी, तेम मारुं मन हजु धन मेलववानी इच्छावाळुं छे, अने तेथी
हुं हाथ जोडीने प्रीतिपूर्वक आपनी प्रार्थना करुं छुं. ॥ २१ ॥ माटे आप एम करो के जेथी हुं
आ भवमांज भोगोवाळो थउं, अने मंत्र साधनारनीपेठे मारी इच्छा दूर फलवाळी न थाउ. ॥
॥ २२ ॥ जे धर्म सेवेला शेठनीपेठे तुरत फल आपतो नथी, ते धर्म घणे काळे शारीते फल
आपशे? ॥ २३ ॥ एवी रीते धम्मिल्लने तुरत फल मेळववानो अर्थी जोइने कृपारसथी उल्लसा-
यमान हृदयवाळा अगलदत्तमुनि बोल्या के, ॥ २४ ॥ हे सौम्य! जेम योग्य जल तथा पृथ्वीना
संयोगथी आम्रवृक्ष तुरत फले छे, तेम उत्तम भाव राखवाथी धर्म पण तुरत फले छे. ॥ २५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २५ ॥ चूतोऽपि तादृगंभोभू–सामग्रीं लभते न चेत् ॥ न फलेत सविलंबं वा । फलेद्धर्मस्तथैव च ॥ २६ ॥ अथाचाम्लतपो वत्स । वत्सरार्धं विधास्यसि ॥ सत्वात्त्वं साधुनेपथ्य—स्तदिष्टां लप्स्यसे श्रियं ॥ २७ ॥ वह्नितापः श्रिये हेम्नो । ग्रीष्मोष्मा घनवृष्टये ॥ क्षारो वस्त्रस्य शुद्ध्यर्थं । पाटवायौषधं कटु ॥ २८ ॥ टंको बिंबस्य पूजार्थं । पृथ्व्याः शस्याय दारणं ॥ कारणं दारुणमपि । तपः कष्टं तथा श्रियः ॥ २९ ॥ भोगार्थं धम्मिलः साधो–र्भेजेऽथ व्रतमित्वरं ॥ पृथुकार्थमिव क्षेत्रं । शा-

---

वळी आम्रवृक्ष पण जो तेवां जल अने पृथ्वीनी सामग्री न पामे तो ते फले नहि, अथवा घणे काळे फले, माटे धर्मना संबंधमां पण तेमज जाणवुं. ॥ २६ ॥ माटे हे वत्स! साधुनो वेष लेइने जो तुं अरधां वर्षसुधी हिम्मत राखीने आंबेलनो तप करीश तो मनोवांछित लक्ष्मी पामीश. ॥ २७ ॥ अग्निनो ताप स्वर्णनी शोभा वधारे छे, उनाळानी गरमी वरसादने लावे छे, खारो कपडांनो मेल दूर करे छे, तथा कडवुं औषध रोग मटाडे छे. ॥ २८ ॥ टांकणुं मूर्त्तिनी पूजा करावे छे, तथा जमीनने खेडवाथी धान्य नीपजे छे, तेम आकरुं तपकष्ट पण लक्ष्मी आपनारुं थाय छे. ॥ २९ ॥ हवे लक्ष्मीनो समुह करनारा भांगरना क्षेत्रने जेम पोंखमाटे सेववामां आवे छे, ते-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ल्लेः श्रीनरकारणं ॥ ३० ॥ उपात्तसाधुनेपथ्यः । प्रस्थितः स ततो द्रुतं । ययौ भ्रमन् भ्रमन् किं-
चि—दनीक्षितवरं पुरं ॥ ३१ ॥ तस्माद्बहिः क्वचिद्भूत—गृहेऽसौ निःपरिग्रहः ॥ अन्यो भूत इवो-
द्भूत—कुवेलत्वादवस्थितः ॥ ३२ ॥ जलयुक्तेन भक्तेन । मुष्टिमानेन सर्वदा ॥ स्वस्य सोऽकल-
यद् वृत्तिं । निरपेक्ष इवासुषु ॥ ३३ ॥ विना स्नानं समुद्भूत–प्रभूतस्वेदपिच्छला ॥ अनुचक्रे तनु-
स्तस्य । सेवालितशिलातलं ॥ ३४ ॥ सर्वार्थसाधकतया । प्रत्याख्यातमिवेह सः ॥ मनागप्यमुच-

म धम्मिल्ले पण अमुक वखतसुधि भोगोमाटे साधुनुं व्रत अंगीकार कर्युं. ॥ ३० ॥ पछी ते साधु-
नो वेष लेइने त्यांथी तुरत चालवा लाग्यो, तथा भमतो भमतो कोइक अजाण्या नगरपासे ग-
यो, ॥ ३१ ॥ तथा रात्री थवाथी ते नगरनी बहार कोइक भूतना मंदिरमां बीजा भूतनीपेठे ते
परिग्रहविनानो धम्मिल्ल रह्यो. ॥ ३२ ॥ वळी जाणे प्राणोनी अपेक्षाविनानो होय नहि तेम ते
हमेशां जलसहित मुठीभर अनाजथी पोतानुं गुजरान चलावतो हतो. ॥ ३३ ॥ स्नानविना अति-
शय पसीनाथी चीकासवाळुं तेनुं शरीर सेवालथी भरेली शीलासरखुं देखावा लाग्युं. ॥ ३४ ॥
सर्व प्रयोजन साधनारुं जाणीने जाणे तेणे प्रत्याख्यान कर्युं होय नहि तेम तेणे जरुरी प्रयोज-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

न्मौनं । न प्राज्येऽपि प्रयोजने ॥ ३५ ॥ यूकामत्कुणदंशादि—क्षुद्रजंतुसमुद्भवां ॥ सेहे देहेन नि-
र्ग्रंथो । निर्वाणार्थीव स व्यथां ॥ ३६ ॥ एवं द्रव्यव्रतस्थेन । षण्मासास्तेन निन्यिरे ॥ तदंते च
दिवो दैवी । वाणी प्रादुरभूदिति ॥ ३७ ॥ भव धम्मिल्ल विश्वस्त—स्त्वं भोगान् भोक्ष्यसे भृशं ॥
विद्याधरनृपेभ्यानां । प्राप्य द्वात्रिंशतं कनीः ॥ ३८ ॥ व्योमजा वारिधारेव । सा तच्चित्तकानने
॥ तपस्याफलसंदेह—दहनं निरवापयत् ॥ ३९ ॥ तपस्वीव कृताहारः । क्षयीवाप्तरसायनः ॥ दवा-

नमाटे पण जरा पण मौन छोड्युं नहि. ॥ ३५ ॥ मोक्षार्थी साधुनीपेठे ते जु, मांकण तथा डांस
आदिक क्षुद्र जंतुओथी शरीरमां उत्पन्न थयेली व्यथाने सहन करवा लाग्यो. ॥ ३६ ॥ एवी रीते
द्रव्य व्रतमां रहीने तेणे छ मासो व्यतीत कर्या, त्यारे आकाशमांथी एवी दिव्य वाणी प्रगट थइ
के, ॥ ३७ ॥ हे धम्मिल्ल! तुं विश्वास राख? तुं विद्याधर राजा तथा शाहुकारोनी बत्रीस कन्याओ
मेळवीने घणा भोगो भोगवीश. ॥ ३८ ॥ एवी रीते आकाशमांथी उत्पन्न थयेली जळधारासरखी
ते वाणीए तेना चित्तरूपी वनमां उत्पन्न थयेला तपस्याना फळना संदेहरूपी अग्निने बुझावी ना-
ख्यो. ॥ ३९ ॥ पछी भोजन करेला तपस्वीनीपेठे, रसायण खाधेला क्षयरोगीनीपेठे तथा वरसा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ग्निस्पृष्टशाखीव । जलवाहजलोक्षितः ॥ ४० ॥ निशि दिव्यगिरा यावत् । तुष्टस्तिष्ठति धम्मिलः ॥
तावत्कात्यायिनी कापि । तन्मठद्वारमाययौ ॥ ४१ ॥ अत्र किं धम्मिलोऽस्तीति । तया पृष्टे कृशध्व-
निः ॥ धम्मिलोऽत्राहमस्मीति । प्रत्युत्तरयतिस्म तां ॥ ४२ ॥ एह्येहि रथमारोह । चल चंपां पुरीं प्र-
ति ॥ तयेत्युक्ते क्षणं चित्तो-दधौ स तिमितां दधौ ॥ ४३ ॥ केयं वेत्ति कथं नाम । ममाह्वयति
किं च मां ॥ इयं निशाचरी मा्नू—द्यद्वालं चिंतयानया ॥ ४४ ॥ तस्या एवाधुना चिंता । दे-

दना जलथी सींचायेला दवदग्ध वृक्षनीपेठे ॥ ४० ॥ ते दिव्य वाणीथी खुश थइने रात्रीए जे-
वामां ते बेठो छे, एवामां कोइक तापसी ते मठना द्वारपासे आवी. ॥ ४१ ॥ अहीं शुं धम्मिल
छे? एम तेणीए धीमे अवाजे पूछवाथी तेणे तेणीने प्रत्युत्तर आप्यो के आ हुं धम्मिल अहीं
बेठो छुं. ॥ ४२ ॥ त्यारे चाल चाल? रथपर चड? अने चंपा नगरीप्रते चाल? एम तेणीए क-
हेवाथी धम्मिल क्षणवार तो पोताना चित्तरूपी समुद्रमां मत्स्यजेवो थइ गयो. ॥ ४३ ॥ ( तथा
विचारवा लाग्यो के ) आ तापसी कोण हशे? मारुं नाम केम जाणती हशे? मने केम बोला-
वे छे? आ राक्षसी तो नहि होय! अथवा आ चिंताथी सर्युं. ॥ ४४ ॥ केमके जे देवीए आ क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्याः कृतमिदं यथा ॥ न हि सा कार्यमारभ्य । निर्वाहे विघटिष्यते ॥ ४५ ॥
अथ भूतमठं कारा—मिव मुक्त्वा कृशोऽपि सः ॥ पुष्टांग इव फालेना—रोहत्तं लीलया रथं ॥ ४६ ॥ ऋषिवेषः स निःशेष—सिद्धेऽर्थे तेन तत्यजे ॥ यद्वा विदलिते व्याधा—वौषधं नोपयुज्यते ॥ ४७ ॥ पूर्वारूढा रथे तेन । ददृशे कापि कन्यका ॥ वस्त्रेणाथ सुश्लिष्टेन । छादिताशेषविग्रहा ॥ ४८ ॥ स रथे सारथीभूय । शठस्ताभ्यामलक्षितः ॥ रथ्यामालंब्य चंपाया । रथ्यावश्वाववा-

---

र्युं छे, तेनेज हवे मारी चिंता छे, केमके ते कार्यनो प्रारंभ करीने तेनो निर्वाह करवामाटे कंइ पाछी पानी भरशे नहि. ॥ ४५ ॥

हवे ते धम्मिल्ल दुबळो छतां पण बलवाननीपेठे केदखानासरखा ते भूतना मठने छोडीने ठेक मारीने लीलामात्रथी ते रथपर चडी बेठो. ॥ ४६ ॥ पछी एवी रीते सघळुं कार्य सिद्ध थयाथी तेणे मुनिनो वेष पण छोडी दीधो, केमके रोग गयाबाद औषधनी कंइ जरुर रहेती नथी. ॥ ॥ ४७ ॥ हवे त्यां प्रथमथीज रथमां बेठेली तथा मजबूत वस्त्रथी ढांकेल छे सर्व शरीर जेणीए एवी कोइक कन्याने तेणे दीठी. ॥ ४८ ॥ हवे तेज बन्नेमांथी कोइए नहि ओळखेलो एवो ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हयत् ॥ ४९ ॥ असावेवन्निशो वृद्धिं । जानन्निव वपुःस्थितिं ॥ दिदृक्षुस्तस्य रूपं सा । भ्रंशं नृप-
कनी पुनः ॥ ५० ॥ आत्तं यस्यानया नाम । सोऽन्यः कश्चन धम्मिलः ॥ न हि कस्यापि नाम्नः
स्या-देक एव विभुर्भुवि ॥ ५१ ॥ अहं स्वनामश्रवणात् । सार्थे लग्नोऽनयोर्वृथा ॥ मद्रूपं नन्विमे
प्रात—र्वीक्ष्य द्वेषं गमिष्यतः ॥ ५२ ॥ एवं चिंतयतस्तस्य । पथि पर्यगलन्निशा ॥ तदा च ध्वस्त-
तिमिरः । सहस्रकर उद्ययौ ॥ ५३ ॥ उपायनीकृतानेक-प्रफुल्लांभोजसौरभां ॥ असौ निरैक्षत न-

हांक्यो धम्मिल सारथी थइने चंपा नगरीने मार्गे रथना घोडाउने हंकारवा लाग्यो. ॥ ४९ ॥ ह-
वे ते धम्मिल पोताना शरीरनी स्थिति जोइने रात्रीनी वृद्धि इछवा लाग्यो, तथा ते राजकन्या
तेनुं रूप जोवामाटे रात्रिना नाशने इछवा लागी. ॥ ५० ॥ आ तापसी ( ते वखते ) जेनुं ना-
म बोली छे ते कोइ बीजोज धम्मिल होवो जोइये, केमके कोइ पण नामनो आ जगतमां को-
इ एकज माणस कइं मालिक होतो नथी. ॥ ५१ ॥ वळी हुं मारुं पोतानुं नाम सांजळीने फोकट
आ बन्नेनी साथे चाल्यो छुं, खरेखर आ बन्ने प्रजाते मारुं रूप जोइने गुस्से थशे. ॥ ५२ ॥ एम
ज्यारे ते चिंतवतो हतो त्यारे मार्गमांज रात्री संपूर्ण थइ, अने ते वखते अंधकारने नाश कर-

दीं । नदीनहृदयः पुरः ॥ ५४ ॥ युक्तिज्ञो योक्त्रमुत्तार्य । तटे तस्या अनातुरः ॥ तुरगौ वारि तृ-
ड्वारि । सोऽध्वश्रांतावपीप्यत ॥ ५५ ॥ स पद्मस्पर्धया प्रात—र्जातलोचनपाटवः ॥ कन्याममेय-
लावण्यां । तां दृष्ट्वा मुमुदे भृशं ॥ ५६ ॥ अंतराले वर्तमानं । मुनिगार्हस्थ्यवेषयोः ॥ सा तु तं
भीषणाकारं । वीक्ष्य खिन्नेत्यवोचत ॥ ५७ ॥ अर्धोद्गतस्थूलकेशो । निम्नीभूताक्षिगोलकः ॥ लंब-
ग्रीवः कृशः क्लीवः । सूर्पाकारनखक्रमः ॥ ५८ ॥ क्षुधा दामोदरः क्षीण—कटीभ्रस्यत्पटच्चरः ॥ निर्मा-

---

नारो सूर्य उदय पाम्यो. ॥ ५३ ॥ एवामां आनंदित हृदयवाळा ते धम्मिल्ले भेट करेल छे अनेक विकस्वर कमलोनी सुगंध जेणे एवी एक नदीने आगामीना भागमां दीठी. ॥ ५४ ॥ पछी युक्तिने जाणनारा ते गंभीर धम्मिल्ले ते नदीने किनारे जोतर छोडीने मार्गमां चालवाथी थाकेला घोडाउने तृषा निवारनारुं जल पायुं. ॥ ५५ ॥ हवे कमलनी स्पर्धाथी प्रभाते आंखो खुल्याबाद ते धम्मिल अत्यंत लावण्यवाळी ते कन्याने जोइने घणो खुशी थयो. ॥ ५६ ॥ पछी मुनि अने गृहस्थना वेषनी वच्चे रहेला भयंकर आकारवाळा ते धम्मिलने जोइने खेद पामेली ते कन्या बोली के, ॥ ५७ ॥ अरे माता! अरधा उगेला जाडा केशवाळो, नीचा थयेला आंखोना मोळावा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सशोणितं देह—मस्थिकूटमयं दधत् ॥ ५९ ॥ दुर्दशादयिताश्लिष्टो । दुर्भिक्षस्येव सेवकः ॥ रंकोऽयं को हहा मातः । स्वसार्थे गृहितस्त्वया ॥ ६० ॥ मन्ये भूतगृहात्तस्मा—द्भूतोऽयं कोऽपि निर्गतः ॥ यदीदृग्भीषणाकारो । मनुष्यः क्वापि नेक्षितः ॥ ६१ ॥ यदि वा न हि भूतोऽयं । न पिशाचो न राक्षसः ॥ किंतु मूर्त्तमिदं पापं । मम लग्नं पुराकृतं ॥ ६२ ॥ ददृशे यो मया पूर्वं । नेत्रांभोज-

ळो, लांबी डोकवाळो, दुबळो, निर्बल, सुपडाजेवा नखपगवाळो, ॥ ५८ ॥ क्षुधाथी खाली उदरवाळो, दुबळी केडपरथी खसी जतां वस्त्रवाळो, मांस अने रुधिरविनाना फक्त हाडपिंजरजेवां शरीरने धारण करनारो, ॥ ५९ ॥ दरिद्रतारूपी स्त्रीथी आलिंगित थयेलो, तथा दुकाळना सेवकसरखो एवो कयो माणस तें आपणी साथे लीधो छे? ॥ ६० ॥ हुं तो धारुं छुं के ते भूतघरमांथी आ कोइक भूतज निकली आव्यो छे, केमके आवा भयंकर आकारवाळो माणस तो क्यांय पण जोवामां आव्यो नथी. ॥ ६१ ॥ अथवा आ भूत पिशाच के राक्षस नथी, परंतु आ तो पूर्वे करेलुं मारुं पापज मूर्तिवंत थइने मारी पाछळ लागेलुं छे. ॥ ६२ ॥ मारां नेत्रोरूपी कमलोने सूर्यसरखो जे धम्मिल पूर्वे में जोयो छे, ते तो आ नथीज, आ तो हे माता! खरेखर मारां नेत्रोरूपी कमलोने

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

दिनोदयः ॥ न सोऽयं निश्चितं मात—र्नैवांभोजनिशोदयः ॥ ६३ ॥ कृपया पापयाभूतां । तदा
मे गदिते दृशौ ॥ रथोपरि समारोढु—मस्य नादास्यमन्यथा ॥ ६४ ॥ यदि धम्मिल्लनामा स्या—त्त-
थाप्येष न मे प्रियः ॥ हरिनाम्नि समानेऽपि । किं श्रीः श्रयति दर्दुरं ॥ ६५ ॥ चेदासेचनको भ-
र्त्ता । न मातः समगंस्त मे ॥ अलं तदग्रतो गत्वा । पश्चाद्यास्याम्यहं पुनः ॥ ६६ ॥ धात्री स्माह
गता पश्चा—द्वत्से लाघवमाप्स्यसि ॥ प्रयाहि चंपां तत्तत्र । कुर्याद्यत्तेऽभिरोचते ॥ ६७ ॥ श्रुताम-

चंद्रसरखो छे. ॥ ६३ ॥ ते वखते आ दुष्ट रात्रीए मारां नेत्रो आच्छादित कर्यां हतां, नहितर हुं र-
थपर चडवा पण न आपत. ॥ ६४ ॥ कदाच आनुं नाम धम्मिल्ल हशे, तो पण ते मने प्रिय था-
य तेम नथी, केमके तुल्य हरिनामवाळा पण देडकानो शुं लक्ष्मी आश्रय करे छे! ॥ ६५ ॥ हे
माता! जो म्हारो प्रियतम भर्तार मने मळ्यो नथी तो हवे आगल जवाथी सर्युं, हुं तो हवे पा-
छी जइश. ॥ ६६ ॥ त्यारे ते धावमाता बोली के हे वत्से! जो तुं पाछी जइश तो तारी हलका-
इ थशे, माटे हाल तो तुं चंपापुरीमां चाल? पछी त्यां तारी इच्छामुजब करजे. ॥ ६७ ॥ एवी री-
तनी तेउनी कथा सांभळ्या छतां पण जाणे बहेरो थइ गयो होय नहि तेम ते धम्मिल्ले पोता-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्यश्रुतां कुर्व—स्तयोरेवं मिथः कथां ॥ रथे सोऽध्ययुनग्वाहौ । धाष्टर्यं ध्यायन्निजे हृदि ॥ ६९ ॥
धम्मिल्लो रथमारोढुं । यावच्चक्रे ददौ पदं ॥ तावत्प्राचीचलद्बाला । सारथीभूय सा रथं ॥ ७० ॥ रथं
हस्तादमुंचंतं । पूपखंममिवार्भकं ॥ अनुदन्निर्दया नृप—कन्या प्रवयसेन तं ॥ ७१ ॥ कुरूप रंक
निर्लज्ज । मुंच रे मामकं रथं ॥ लेष्टूनिवानन्नुक्रोशा—क्रोशानिति जगाद सा ॥ ७२ ॥ आस-
न्नाभ्यस्तसंन्यस्त-संस्कारादिव नात्यजत् ॥ असौ क्षमां च मौनं च । मान्यपि स्वार्थसिद्धये ॥७३॥

---

ना मनमां बुद्धिइ वापरीने घोडाउने रथमां जोड्या. ॥ ६९ ॥ पछी रथपर चमवामाटे जेवामां
धम्मिल्ले चक्रपर पग दीधो, तेवामां ते कन्याएज सारथी थइने रथ चलाव्यो. ॥ ७० ॥ हवे बा-
ळक जेम मीठाइना टुकडाने तेम हाथमांथी रथने नहि छोडता एवा ते धम्मिल्लने ते निर्दय रा-
जकन्या चाबुक मारवा लागी. ॥ ७१ ॥ तथा अरे कुरूप! रंक! निर्लज्ज! तुं मारा रथने छोड?
एवी रीते अत्यंत आक्रोशवाळां वचनो कहेवा लागी. ॥७२ ॥ नजीकमां अभ्यस्त करेला सन्या-
सीपणाना संस्कारथी जाणे होय नहि तेम मानी छतां पण तेणे स्वार्थसिद्धिमाटे क्षमा अने
मौन तज्यां नहि. ॥ ७३ ॥ हवे ते कमलमुखी कन्याए मार्गे चालतांथकां भोजनवखते थाक उ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोजनावसरे भोज—नयना पथि गच्छती ॥ श्रमं निराकर्तुकामा । स्थापयामास सा रथं ॥ ७३ ॥
प्रवेष्टुमक्षमे मध्ये । ग्रामं योषित्स्वभावतः ॥ अन्यागत्येंगितज्ञान—प्रवीणो धम्मिल्लो जगौ ॥
॥ ७४ ॥ विभ्राये मास्म जायेथां । युवामत्रैव तिष्ठतां ॥ गत्वा भोजनसामग्री—मानयामि द्रुतं त्व-
हं ॥ ७५ ॥ अथावस्थाप्य ते तत्र । ग्राममध्यमसौ गतः ॥ युक्तमस्तोकलोकेन । ग्रामस्वामिनमैक्ष-
त ॥ ७६ ॥ तुरंगं लोकमध्यस्थं ॥ दर्शं दर्शं विषादिनं ॥ प्रणिपत्य तमप्राक्षीत् । स विषादस्य का-
रणं ॥ ७७ ॥ ग्रामाधीशोऽवदद्भद्र । किशोरो मे सलक्षणः ॥ हेतोः कुतोऽप्यनुदिनं । क्षीयते क्ष-

---

तारवा माटे रथ उभो राख्यो. ॥ ७३ ॥ हवे इंगितज्ञानमां हुशियार एवा ते धम्मिल्ले तेउने स्त्री-
स्वभावथी गाममां जवाने असमर्थ जाणीने सामे आवीने कह्युं के, ॥ ७४ ॥ तमो मुंझाउमां,
अने अहींज रहो, अने हुं गाममां जइने जलदी भोजननी सामग्री लावुं छुं. ॥ ७५ ॥ पछी ते-
उने त्यां राखीने धम्मिल्ल गामनी अंदर गयो, त्यां तेणे घणा माणसोथी युक्त थयेला ते गाम-
ना ठाकोरने जोयो. ॥ ७६ ॥ त्यां माणसोनी वच्चे रहेला एक घोडाने जोइ जोइने खेद पामता
एवा ते ठाकोरने नमीने तेणे खेदनुं कारण पूछ्युं. ॥ ७७ ॥ त्यारे ठाकोरे कह्युं के हे भद्र! मा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यरोगिवत् ॥ ७८ ॥ अस्य विदधिरे वैद्यै–रुपचारा अनेकशः ॥ गिराविव शरास्तेऽपि । सर्वे वैयर्थ्य-
मीयिरे ॥ ७९ ॥ मम जीवितसर्वस्वं । अश्वो विश्वोत्तराकृतिः ॥ अनुपायात्परञ्जवं । गंता तेनास्मि
दुःखितः ॥ ८० ॥ धम्मिल्लोऽभिदधे धीम–न्नहं जानामि चेष्टितैः ॥ प्रच्छन्नं पापकर्मैव । शल्यं देहे-
ऽस्ति किंचन ॥ ८१ ॥ ततः स चतुरो मृत्स्ना । सलिलक्लिन्नया तदा ॥ तुरंगस्य तनुं भित्तिं । सु-
धावल्लेपयत्ययं ॥ ८२ ॥ छायास्थे तुरगे पूर्व–मशुष्यद्यत्र मृत्तिका ॥ तस्मिन्नवयवे शल्य—मंतःस्थं

---

रो आ उत्तम लक्षणवाळो वछेरो कोण जाणे शा कारणथी हमेशां क्षयरोगीनीपेठे क्षीण थतो
जाय छे. ॥ ७८ ॥ आने माटे वैद्योए अनेक उपायो कर्या, परंतु पर्वतप्रते जेम बाणो तेम ते
सघला फोकट गया छे. ॥ ७९ ॥ मारा प्राणसरखो तथा जगतमां अनुपम आकृतिवाळो मारो आ
घोडो नाइलाजे मरण पामशे, अने तेथी हुं खेद पामुं छुं. ॥ ८० ॥ त्यारे धम्मिल्ल बोल्यो के हे
बुद्धिवान् ठाकोर! हुं आनी चेष्टाथी धारुं छुं के गुप्त पापकार्यनीपेठे आना शरीरमां कइंक शल्य
छे. ॥ ८१ ॥ पछी ते चतुर धम्मिल्ले तेज वखते भींतपर जेम चुनो तेम पाणीथी भींजवेली मा-
